# Shivasamhita

# શિવસંહિતા

## Document Information

Text title : Shiva Samhita

File name : shivasaMhitA.itx

Category : shiva, yoga

Location : doc_shiva

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski, expanded/compiled by Ruma Dewan

Proofread by : Muktabodha.org, Ruma Dewan

Description/comments : Shlokas renumbered for expanded version.

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : June 7, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 10, 2022

*sanskritdocuments.org*

# શિવસંહિતા

## પ્રથમપટલઃ

અથ લયપ્રકરણમ્ ।

એકં જ્ઞાનં નિત્યમાદ્યન્તશૂન્યં
    નાન્યત્ કિઞ્ચિદ્વર્તતે તે વસ્તુ સત્યમ્ । (કિઞ્ચિદ્વત્તે)
યદ્ભેદોસ્મિન્નિન્દ્રિયોપાધિના વૈ
    જ્ઞાનસ્યાયં ભાસતે નાન્યથૈવ ॥ ૧.૧॥

અથ ભક્તાનુરક્તોઽહં વક્ષ્યે યોગાનુશાસનમ્ । (વક્તિ)
ઈશ્વરઃ સર્વભૂતાનામાત્મમુક્તિપ્રદાયકઃ ॥ ૧.૨॥

ત્યક્ત્વા વિવાદશીલાનાં મતં દુર્જ્ઞાનહેતુકમ્ ।
આત્મજ્ઞાનાય ભૂતાનામનન્યગતિચેતસામ્ ॥ ૧.૩॥

સત્યં કેચિત્પ્રશંસન્તિ તપઃ શૌચં તથાપરે ।
ક્ષમાં કેચિત્પ્રશંસન્તિ તથૈવ સમમાર્જ્જવમ્ ॥ ૧.૪॥

કેચિદ્દાનં પ્રશંસન્તિ પિતૃકર્મ તથાપરે ।
કેચિત્કર્મ પ્રશંસન્તિ કેચિદ્વૈરાગ્યમુત્તમમ્ ॥ ૧.૫॥

કેચિદ્ગૃહસ્થકર્માણિ પ્રશંસન્તિ વિચક્ષણાઃ ।
અગ્નિહોત્રાદિકં કર્મ તથા કેચિત્ પરં વિદુઃ ॥ ૧.૬॥

મન્ત્રયોગં પ્રશંસન્તિ કિચિત્તિર્થાનુસેવનમ્ ।
એવં બહૂનુપાયાંસ્તુ પ્રવદન્તિ હિ મુક્તયે ॥ ૧.૭॥ (વિમુક્તયે)

એવં વ્યવસિતા લોકે કૃત્યાકૃત્યવિદો જનાઃ ।
વ્યામોહમેવ ગચ્છન્તિ વિમુક્તાઃ પાપકર્મભિઃ ॥ ૧.૮॥

એતન્મતાવલમ્બી યો લબ્ધ્વા દુરિતપુણ્યકે ।
ભ્રમતીત્યવશઃ સોઽત્ર જન્મમૃત્યુપરમ્પરામ્ ॥ ૧.૯॥

અન્યૈર્મતિમતાં શ્રેષ્ઠૈર્ગુપ્તાલોકનતત્પરૈઃ ।
આત્માનો બહવઃ પ્રોક્તા નિત્યાઃ સર્વગતાસ્તથા ॥ ૧.૧૦॥

યદ્યત્પ્રત્યક્ષવિષયં તદન્યન્નાસ્તિ ચક્ષતે ।
કુતઃ સ્વર્ગાદયઃ સન્તીત્યન્યે નિશ્ચિતમાનસાઃ ॥ ૧.૧૧॥

જ્ઞાનપ્રવાહ ઇત્યન્યે શૂન્યં કેચિત્પરં વિદુઃ ।
દ્વાવેવ તત્ત્વં મન્યન્તેઽપરે પ્રકૃતિપૂરુષૌ ॥ ૧.૧૨॥

અત્યન્તભિન્નમતયઃ પરમાર્થપરાઙ્મુખાઃ ।
એવમન્યે તુ સઞ્ચિન્ત્ય યથામતિ યથાશ્રુતમ્ ॥ ૧.૧૩॥

નિરીશ્વરમિદં પ્રાહુઃ સેશ્વરઞ્ચ તથાપરે ।
વદન્તિ વિવિધૈર્ભેદૈઃ સુયુક્ત્યા સ્થિતિકાતરાઃ ॥ ૧.૧૪॥

એતે ચાન્યે ચ મુનયઃ સંજ્ઞાભેદા પૃથગ્વિધાઃ ।
શાસ્ત્રેષુ કથિતા હ્યેતે લોકવ્યામોહકારકાઃ ॥ ૧.૧૫॥

એતદ્વિવાદશીલાનાં મતં વક્તું ન શક્યતે ।
ભ્રમન્ત્યસ્મિઞ્જનાઃ સર્વે મુક્તિમાર્ગબહિષ્કૃતાઃ ॥ ૧.૧૬॥

આલોક્ય સર્વશાસ્ત્રાણિ વિચાર્ય ચ પુનઃ પુનઃ ।
ઇદમેકં સુનિષ્પન્નં યોગશાસ્ત્રં પરં મતમ્ ॥ ૧.૧૭॥

યસ્મિન્જ્ઞાતે સર્વમિદં યાતં ભવતિ નિશ્ચિતમ્ ।
તસ્મિન્પરિશ્રમઃ કાર્યઃ કિમન્યચ્છાસ્ત્રભાષિતમ્ ॥ ૧.૧૮॥

યોગશાસ્ત્રમિદં ગોપ્યમસ્માભિઃ પરિભાષિતમ્ ।
સુભક્તાય પ્રદાતવ્યં ત્રૈલોક્યે ચ મહાત્મને ॥ ૧.૧૯॥

કર્મકાણ્ડં જ્ઞાનકાણ્ડમિતિ વેદો દ્વિધા મતઃ ।
ભવતિ દ્વિવિધો ભેદો જ્ઞાનકાણ્ડસ્ય કર્મણઃ ॥ ૧.૨૦॥

દ્વિવિધઃ કર્મકાણ્ડઃ સ્યાન્નિષેધવિધિપૂર્વકઃ ।
નિષિદ્ધકર્મકરણે પાપં ભવતિ નિશ્ચિતમ્ ।
વિધિના કર્મકરણે પુણ્યં ભવતિ નિશ્ચિતમ્ ॥ ૧.૨૧॥

ત્રિવિધો વિધિકૂટઃ સ્યાન્નિત્યનૈમિત્તકામ્યતઃ ।
નિત્યેઽકૃતે કિલ્વિષં સ્યાત્કામ્યે નૈમિત્તિકે ફલમ્ ॥ ૧.૨૨॥

દ્વિવિધન્તુ ફલં જ્ઞેયં સ્વર્ગો નરક એવ ચ ।

સ્વર્ગો નાનાવિધશ્ચૈવ નરકોપિ તથા ભવેત્ ॥ ૧.૨૩॥

પુણ્યકર્માણિ વૈ સ્વર્ગો નરકઃ પાપકર્માણિ । (પુણ્યકર્મણિ, પાપકર્મણિ)
કર્મબન્ધમયી સૃષ્ટિર્નાન્યથા ભવતિ ધ્રુવમ્ ॥ ૧.૨૪॥

જન્તુભિશ્ચાનુભૂયન્તે સ્વર્ગે નાનાસુખાનિ ચ ।
નાનાવિધાનિ દુઃખાનિ નરકે દુઃસહાનિ વૈ ॥ ૧.૨૫॥

પાપકર્મવશાદ્દુઃખં પુણ્યકર્મવશાત્સુખમ્ ।
તસ્માત્સુખાર્થી વિવિધં પુણ્યં પ્રકુરુતે ધ્રુવમ્ ॥ ૧.૨૬॥

પાપભોગાવસાને તુ પુનર્જન્મ ભવેત્ખલુ ।
પુણ્યભોગાવસાને તુ નાન્યથા ભવતિ ધ્રુવમ્ ॥ ૧.૨૭॥

સ્વર્ગેઽપિ દુઃખસમ્ભોગઃ પરસ્ત્રીદર્શનાદ્ધ્રુવમ્ ।
તતો દુઃખમિદં સર્વં ભવેન્નાસ્ત્યત્ર સંશયઃ ॥ ૧.૨૮॥

તત્કર્મકલ્પકૈઃ પ્રોક્તં પુણ્યં પાપમિતિ દ્વિધા ।
પુણ્યપાપમયો બન્ધો દેહિનાં ભવતિ ક્રમાત્ ॥ ૧.૨૯॥

ઇહામુત્ર ફલદ્વેષી સફલં કર્મ સન્ત્યજેત્ ।
નિત્યનૈમિત્તિકં સઙ્ગં ત્યક્ત્વા યોગે પ્રવર્તતે ॥ ૧.૩૦॥

કર્મકાણ્ડસ્ય માહાત્મ્યં જ્ઞાત્વા યોગી ત્યજેત્સુધીઃ ।
પુણ્યપાપદ્વયં ત્યક્ત્વા જ્ઞાનકાણ્ડે પ્રવર્તતે ॥ ૧.૩૧॥

આત્મા વાઽરેતુ દ્રષ્ટવ્યઃ શ્રોતવ્યેત્યાદિ યચ્છ્રુતિઃ । (વા રે ચ) (શ્રોતવ્યો મન્તવ્ય ઇતિ)
સા સેવ્યા તત્પ્રયત્નેન મુક્તિદા હેતુદાયિની ॥ ૧.૩૨॥

દુરિતેષુ ચ પુણ્યેષુ યો ધીર્વૃત્તિં પ્રચોદયાત્ ।
સોઽહં પ્રવર્તતે મત્તો જગત્સર્વં ચરાચરમ્ ॥ ૧.૩૩॥

સર્વં ચ દૃશ્યતે મત્તઃ સર્વં ચ મયિ લીયતે ।
ન તદ્ભિન્નોઽહમસ્મીહ મદ્ભિન્નો ન તુ કિઞ્ચન ॥ ૧.૩૪॥

જલપૂર્ણેષ્વસઙ્ખ્યેષુ શરાવેષુ યથા ભવેત્ ।
એકસ્ય ભાત્યસઙ્ખ્યત્વં તદ્ભેદોઽત્ર ન દૃશ્યતે ॥ ૧.૩૫॥

ઉપાધિષુ શરાવેષુ યા સઙ્ખ્યા વર્તતે પરા ।
સા સઙ્ખ્યા ભવતિ યથા રવૌ ચાત્મનિ તત્તથા ॥ ૧.૩૬॥

યથૈકઃ કલ્પકઃ સ્વપ્ને નાનાવિધિતયેષ્યતે ।
જાગરેઽપિ તથાપ્યેકસ્તથૈવ બહુધા જગત્ ॥ ૧.૩૭॥

સર્પબુદ્ધિર્યથા રજ્જૌ શુક્તૌ વા રજતભ્રમઃ ।
તદ્વદેવમિદં વિશ્વં વિવૃતં પરમાત્મનિ ॥ ૧.૩૮॥

રજ્જુજ્ઞાનાદ્યથા સર્પો મિથ્યારૂપો નિવર્તતે ।
આત્મજ્ઞાનાત્તથા યાતિ મિથ્યાભૂતમિદં જગત્ ॥ ૧.૩૯॥

રૌપ્યભ્રાન્તિરિયં યાતિ શુક્તિજ્ઞાનાદ્યથા ખલુ ।
જગદ્ભ્રાન્તિરિયં યાતિ ચાત્મજ્ઞાનાત્સદા તથા ॥ ૧.૪૦॥ (ચાત્મજ્ઞાનાદ્યથા)

યથા વંશો રગભ્રાન્તિર્ભવેદ્ભેકવસાઞ્જનાત્ ।
(યથા રજ્જૂગભ્રાન્તિર્ભવેદ્ભેદવશાજ્જગત્)
તથા જગદિદં ભ્રાન્તિરધ્યાસકલ્પનાજ્જગત્ । (ભ્રાન્તિરભ્યાસકલ્પનાઞ્જનાત્)
આત્મજ્ઞાનાદ્યથા નાસ્તિ રજ્જુજ્ઞાનાદ્ભુજઙ્ગમઃ ॥ ૧.૪૧॥

યથા દોષવશાચ્છુક્લઃ પીતો ભવતિ નાન્યથા ।
અજ્ઞાનદોષાદાત્માપિ જગદ્ભવતિ દુસ્ત્યજમ્ ॥ ૧.૪૨॥

દોષનાશે યથા શુક્લો ગૃહ્યતે રોગિણા સ્વયમ્ ।
શુક્લજ્ઞાનાત્તથાજ્ઞાનનાશાદાત્મા તથા કૃતઃ ॥ ૧.૪૩॥

કાલત્રયેઽપિ ન યથા રજ્જુઃ સર્પો ભવેદિતિ ।
તથાત્મા ન ભવેદ્વિશ્વં ગુણાતીતો નિરઞ્જનઃ ॥ ૧.૪૪॥

આગમાઽપાયિનોઽનિત્યાનાશ્યત્વેનેશ્વરાદયઃ ।
આત્મબોધેન કેનાપિ શાસ્ત્રાદેતદ્વિનિશ્ચિતમ્ ॥ ૧.૪૫॥

યથા વાતવશાત્સિન્ધાવુત્પન્નાઃ ફેનબુદ્બુદાઃ ।
તથાત્મનિ સમુદ્ભૂતં સંસારં ક્ષણભઙ્ગુરમ્ ॥ ૧.૪૬॥

અભેદો ભાસતે નિત્યં વસ્તુભેદો ન ભાસતે ।
દ્વિધાત્રિધાદિભેદોઽયં ભ્રમત્વે પર્યવસ્યતિ ॥ ૧.૪૭॥

યદ્ભૂતં યચ્ચ ભાવ્યં વૈ મૂર્તામૂર્તં તથૈવ ચ ।
સર્વમેવ જગદિદં વિવૃતં પરમાત્મનિ ॥ ૧.૪૮॥

કલ્પકૈઃ કલ્પિતા વિદ્યા મિથ્યા જાતા મૃષાત્મિકા ।
એતાન્મૂલં જગદિદં કથં સત્યં ભવિષ્યતિ ॥ ૧.૪૯॥ (એતન્મૂલં)

ચૈતન્યાત્સર્વમુત્પન્નં જગદેતચ્ચરાચરમ્ ।
તસ્માત્સર્વં પરિત્યજ્ય ચૈતેન્યં તુ સમાશ્રયેત્ ॥ ૧.૫૦॥ (તં)

ઘટસ્યાભ્યન્તરે બાહ્યે યથાકાશં પ્રવર્તતે ।
તથાત્માભ્યન્તરે બાહ્યે બ્રહ્માણ્ડસ્ય પ્રવર્તતે ॥ ૧.૫૧॥
(તથાત્માભ્યન્તરે બાહ્યે કાર્યવર્ગેષુ નિત્યશઃ)

સતતં સર્વભૂતેષુ યથાકાશં પ્રવર્તતે ।
તથાત્માભ્યન્તરે બાહ્યે બ્રહ્માણ્ડસ્ય પ્રવર્તતે ॥ ૧.૫૨॥

વર્તતે સર્વભૂતેષુ યથાકાશં સમન્તતઃ ।
તથાત્માભ્યન્તરે બાહ્યે કાર્યવર્ગેષુ નિત્યશઃ ॥ ૧.૫૩॥

અસંલગ્નં યથાકાશં મિથ્યાભૂતેષુ પઞ્ચસુ ।
અસંલગ્નસ્તથાત્મા તુ કાર્યવર્ગેષુ નાન્યથા ॥ ૧.૫૪॥

ઈશ્વરાદિજગત્સર્વમાત્મવ્યાપ્તં સમન્તતઃ । (વ્યાપ્યં)
એકોઽસ્તિ સચ્ચિદાનન્દઃ પૂર્ણો દ્વૈતવિવર્જિતઃ ॥ ૧.૫૫॥

યસ્માત્પ્રકાશકો નાસ્તિ સ્વપ્રકાશો ભવેત્તતઃ ।
સ્વપ્રકાશો યતસ્તસ્માદાત્મા જ્યોતિઃ સ્વરૂપકઃ ॥ ૧.૫૬॥

અવચ્છિન્નો યતો નાસ્તિ દશકાલસ્વરૂપતઃ । (અવછિન્નો)
આત્મનઃ સર્વથા તસ્માદાત્મા પૂર્ણો ભવેત્ખલુ ॥ ૧.૫૭॥

યસ્માન્ન વિદ્યતે નાશઃ પઞ્ચભૂતૈર્વૃથાત્મકૈઃ ।
તસ્માદાત્મા ભવેન્નિત્યસ્તન્નાશો ન ભવેત્ખલુ ॥ ૧.૫૮॥

યસ્માત્તદન્યો નાસ્તીહ તસ્માદેકોઽસ્તિ સર્વદા ।
યસ્માત્તદન્યો મિથ્યા સ્યાદાત્મા સત્યો ભવેત્ખલુ ॥ ૧.૫૯॥

અવિદ્યાભુતસંસારે દુઃખનાશે સુખં યતઃ ।
જ્ઞાનાદાદ્યન્તશૂન્યં સ્યાત્તસ્માદાત્મા ભવેત્સુખમ્ ॥ ૧.૬૦॥

યસ્માન્નાશિતમજ્ઞાનં જ્ઞાનેન વિશ્વકારણમ્ ।
તસ્માદાત્મા ભવેજ્જ્ઞાનં જ્ઞાનં તસ્માત્સનાતનમ્ ॥ ૧.૬૧॥

કાલતો વિવિધં વિશ્વં યદા ચૈવ ભવેદિદમ્ ।
તદેકોઽસ્તિ સ એવાત્મા કલ્પનાપથવર્જિતઃ ॥ ૧.૬૨॥

બાહ્યાનિ સર્વભૂતાનિ વિનાશં યાન્તિ કાલતઃ ।

યતો વાચો નિવર્તન્તે આત્મા દ્વૈતવિવર્જિતઃ ॥ ૧.૬૩॥

ન ખં વાયુર્ન ચાગ્નિશ્ચ ન જલં પૃથિવી ન ચ ।
નૈતત્કાર્યં નેશ્વરાદિ પૂર્ણૈકાત્મા ભવેત્ખલુ ॥ ૧.૬૪॥ (નૈંતત્કાયૈ / નૈર્તત્કાયૈ) (પૂર્ણૈકાત્મા)

આત્માનમાત્મનો યોગી પશ્યત્યાત્મનિ નિશ્ચિતમ્ ।
સર્વસઙ્કલ્પસંન્યાસી ત્યક્તમિથ્યાભવગ્રહઃ ॥ ૧.૬૫॥

આત્માનાત્મનિ ચાત્માનં દૃષ્ટ્વાનન્તં સુખાત્મકમ્ ।
વિસ્મૃત્ય વિશ્વં રમતે સમાધેસ્તીવ્રતસ્તથા ॥ ૧.૬૬॥

માયૈવ વિશ્વજનની નાન્યા તત્ત્વધિયાપરા ।
યદા નાશ સમાયાતિ વિશ્વં નાસ્તિ તદા ખલુ ॥ ૧.૬૭॥

હેયં સર્વમિદં યસ્ય માયાવિલસિતં યતઃ ।
તતો ન પ્રીતિવિષયસ્તનુવિત્તસુખાત્મકઃ ॥ ૧.૬૮॥

અરિર્મિત્રમુદાસીનસ્ત્રિવિધં સ્યાદિદં જગત્ ।
વ્યવહારેષુ નિયતં દૃશ્યતે નાન્યથા પુનઃ ॥ ૧.૬૯॥

પ્રિયાપ્રિયાદિભેદસ્તુ વસ્તુષુ નિયતસ્ફુટમ્ ।
આત્મોપાધિવશાદેવં ભવેત્પુત્રાદિ નાન્યથા ॥ ૧.૭૦॥

માયાવિલસિતં વિશ્વં જ્ઞાત્વૈવં શ્રુતિયુક્તિતઃ ।
અધ્યારોપાપવાદાભ્યાં લયં કુર્વન્તિ યોગિનઃ ॥ ૧.૭૧॥

કર્મજન્યં વિશ્વમિદં નત્વકર્મણિ વેદના ।
નિખિલોપાધિહીનો વૈ યદા ભવતિ પૂરુષઃ ।
તદા વિજયતેઽખણ્ડજ્ઞાનરૂપી નિરઞ્જનઃ ॥ ૧.૭૨॥ (વિવક્ષતેઽખણ્ડજ્ઞાનરૂપી)

સ હિ કામયતે પુરુષઃ સૃજતે ચ પ્રજાઃ સ્વયમ્ । (સો કામયતઃ)
અવિદ્યા ભાસતે યસ્માત્તસ્માન્મિથ્યા સ્વભાવતઃ ॥ ૧.૭૩॥

શુદ્ધે બ્રહ્મણિ સમ્બદ્ધો વિદ્યયા સહજો ભવેત્ ।
(શુદ્ધે બ્રહ્મત્વ સમ્બદ્ધો વિદ્યયા સહિતો ભવેત્ ।)
બ્રહ્મતેજોંઽશતો યાતિ તત આભાસતે નભઃ ॥ ૧.૭૪॥
(બ્રહ્મતેનસતી યાતિ યત આભાસતે નભઃ)

તસ્માત્પ્રકાશતે વાયુર્વાયોરગ્નિસ્તતો જલમ્ ।
પ્રકાશતે તતઃ પૃથ્વીકલ્પનેયં સ્થિતા સતિ ॥ ૧.૭૫॥

આકાશાદ્વાયુરાકાશઃ પવનાદગ્નિસમ્ભવઃ ।
ખેવાતાગ્નેર્જલં વ્યોમવાતાગ્નેર્વારિતો મહી ॥ ૧.૭૬॥
(ખવાતાગ્નેર્જલં વ્યોમવાતાગ્નિવારિતો મહી)

ખં શબ્દલક્ષણં વાયુશ્ચઞ્ચલઃ સ્પર્શલક્ષણઃ ।
સ્યાદ્રૂપલક્ષણં તેજઃ સલિલં રસલક્ષણમ્ ॥ ૧.૭૭॥

ગન્ધલક્ષણિકા પૃથ્વી નાન્યથા ભવતિ ધ્રુવમ્ ।
વિષેશગુણાઃ સ્ફુરતિ યતઃ શાસ્ત્રાદિનિર્ણયઃ ॥ ૧.૭૮॥

શબ્દૈકગુણમાકાશં દ્વિગુણો વાયુરુચ્યતે । (સ્યાદેકગુણમાકાશં)
તથૈવ ત્રિગુણં તેજો ભવન્ત્યાપશ્ચતુર્ગુણાઃ ॥ ૧.૭૯॥

શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધસ્તથૈવ ચ ।
એતત્પઞ્ચગુણા પૃથ્વી કલ્પકૈઃ કલ્પ્યતેઽધુના ॥ ૧.૮૦॥

ચક્ષુષા ગૃહ્યતે રૂપં ગન્ધો ઘ્રાણેન ગૃહ્યતે ।
રસો રસનયા સ્પર્શસ્ત્વચા સઙ્ગૃહ્યતે પરમ્ ।
શ્રોત્રેણ ગૃહ્યતે શબ્દો નિયતં ભાતિ નાન્યથા ॥ ૧.૮૧॥

ચૈતન્યાત્સર્વમુત્પન્નં જગદેતચ્ચરાચરમ્ ।
અસ્તિ ચેત્કલ્પનેયં સ્યાન્નાસ્તિ ચેદસ્તિ ચિન્મયમ્ ॥ ૧.૮૨॥

પૃથ્વી શીર્ણા જલં મગ્ના જલં મગ્નં ચ તેજસિ ।
લીનં વાયૌ તથા તેજો વ્યોમ્નિ વાતો લયં યયૌ ।
અવિદ્યાયાં મહાકાશો લીયતે પરમે પદે ॥ ૧.૮૩॥

વિક્ષેપાવરણાશક્તિર્દુરન્તા દુઃખરૂપિણી ।
જડરૂપા મહામાયા રજઃસત્ત્વતમોગુણા ॥ ૧.૮૪॥

સા માયાવરણાશક્ત્યાવૃતાવિજ્ઞાનરૂપિણી ।
દર્શયેજ્જગદાકારં તં વિક્ષેપસ્વભાવતઃ ॥ ૧.૮૫॥

તમોગુણાત્મિકા વિદ્યા યા સા દુર્ગા ભવેત્સ્વયમ્ । (તમો ગુણાધિકા) (દૂર્ગા)
ઈશ્વરં તદુપહિતં ચૈતન્યં તદભૂદ્ધ્રુવમ્ ॥ ૧.૮૬॥

સત્ત્વાધિકા ચ યા વિદ્યા લક્ષ્મીઃ સ્યાદ્દિવ્યરૂપિણી ।
ચૈતન્યં તદુપહિતં વિષ્ણુર્ભવતિ નાન્યથા ॥ ૧.૮૭॥

રજોગુણાધિકા વિદ્યા જ્ઞેયા સા વૈ સરસ્વતી ।

કશ્ચિત્સ્વરૂપો ભવતિ બ્રહ્મા તદુપધારકઃ ॥ ૧.૮૮॥ (યશ્ચિત્સ્વરૂપો)

ઈશાદ્યાઃ સકલા દેવા દૃશ્યન્તે પરમાત્મનિ ।
શરીરાદિજડં સર્વં સા વિદ્યા તત્તથા તથા ॥ ૧.૮૯॥

એવંરૂપેણ કલ્પન્તે કલ્પકા વિશ્વસમ્ભવમ્ ।
તત્ત્વાતત્ત્વં ભવન્તીહ કલ્પનાન્યેન નોદિતા ॥ ૧.૯૦॥ (ચોદિતા)

પ્રમેયત્વાદિરૂપેણ સર્વં વસ્તુ પ્રકાશ્યતે ।
તથૈવ વસ્તુનાસ્ત્યેવ ભાસકો વર્તકઃ પરઃ ॥ ૧.૯૧॥

સ્વરૂપત્વેન રૂપેણ સ્વરૂપં વસ્તુ ભાષ્યતે ।
વિશેષશબ્દોપાદાને ભેદો ભવતિ નાન્યથા ॥ ૧.૯૨॥

એકઃ સત્તાપૂરિતાનન્દરૂપઃ પૂર્ણો વ્યાપી વર્તતે નાસ્તિ કિઞ્ચિત્ ।
એતજ્જ્ઞાનં યઃ કરોત્યેવ નિત્યં મુક્તઃ સ સ્યાન્મૃત્યુસંસારદુઃખાત્ ॥ ૧.૯૩॥

યસ્યારોપાપવાદાભ્યાં યત્ર સર્વે લયં ગતાઃ ।
સ એકો વર્તતે નાન્યત્તચ્ચિત્તેનાવધાર્યતે ॥ ૧.૯૪॥

પિતુરન્નમયાત્કોષાજ્જાયતે પૂર્વકર્મણઃ ।
તચ્છરીરંવિર્દુદુઃખં સ્વપ્રાગ્ભોગાય સુન્દરમ્ ॥ ૧.૯૫॥ (શરીરં વૈ જડં દુઃખં)

માંસાસ્થિસ્નાયુમજ્જાદિનિર્મિતં ભોગમન્દિરમ્ ।
કેવલં દુઃખભોગાય નાડી સન્તતિગુમ્ફિતમ્ ॥ ૧.૯૬॥

પારમૈષ્ઠ્યમિદં ગાત્રં પઞ્ચભૂતવિનિર્મિતમ્ ।
બ્રહ્માણ્ડસંજ્ઞકં દુઃખસુખભોગાય કલ્પિતમ્ ॥ ૧.૯૭॥

બિન્દુઃ શિવો રજઃ શક્તિરુભયોર્મિલનાત્સ્વયમ્ ।
સ્વપ્નભૂતાનિ જાયન્તે સ્વશક્ત્યા જડરૂપયા ॥ ૧.૯૮॥

તત્પઞ્ચીકરણાત્સ્થૂલાન્યસઙ્ખ્યાનિ ચરાચરમ્ । (સમાસતઃ)
બ્રહ્માણ્ડસ્થાનિ વસ્તૂનિ યત્ર જીવોઽસ્તિ કર્મભિઃ ॥ ૧.૯૯॥

તદ્ભૂતપઞ્ચકાત્સર્વં ભોગાય જીવસંજ્ઞિતા ।
પૂર્વકર્માનુરોધેન કરોમિ ઘટનામહમ્ ॥ ૧.૧૦૦॥

અજડઃ સર્વભૂતાન્વૈ જડસ્થિત્યા ભુનક્તિતાન્ । (સર્વભૂતસ્થા)
જડાત્સ્વકર્મભિર્બદ્ધો જીવાખ્યો વિવિધો ભવેત્ ॥ ૧.૧૦૧॥

ભોગાયોત્પદ્યતે કર્મ બ્રહ્માણ્ડાખ્યે પુનઃ પુનઃ ।
જીવશ્ચ લીયતે ભોગાવસાને ચ સ્વકર્મણઃ ॥ ૧.૧૦૨॥

ઇતિ શ્રીશિવસંહિતાયાં હરગૌરીસંવાદે યોગશાસ્ત્રે
લયપ્રકરણે પ્રથમઃ પટલઃ સમાપ્તઃ । ૧।

## દ્વિતીયપટલઃ

અથ તત્ત્વજ્ઞાનોપદેશ ।
દેહેऽસ્મિન્વર્તતે મેરુઃ સપ્તદ્વીપસમન્વિતઃ ।
સરિતઃ સાગરાઃ શૈલાઃ ક્ષેત્રાણિ ક્ષેત્રપાલકાઃ ॥ ૨.૧॥

ઋષયો મુનયઃ સર્વે નક્ષત્રાણિ ગ્રહાસ્તથા ।
પુણ્યતીર્થાનિ પીઠાનિ વર્તન્તે પીઠદેવતાઃ ॥ ૨.૨॥

સૃષ્ટિસંહારકર્તારૌ ભ્રમન્તૌ શશિભાસ્કરૌ ।
નભો વાયુશ્ચ વહ્નિશ્ચ જલં પૃથ્વી તથૈવ ચ ॥ ૨.૩॥

ત્રૈલોક્યે યાનિ ભૂતાનિ તાનિ સર્વાણિ દેહતઃ ।
મેરું સંવેષ્ટ્ય સર્વત્ર વ્યવહારઃ પ્રવર્તતે ।
જાનાતિ યઃ સર્વમિદં સ યોગી નાત્ર સંશયઃ ॥ ૨.૪॥

બ્રહ્માણ્ડસંજ્ઞકે દેહે યથાદેશં વ્યવસ્થિતઃ ।
મેરુશૃઙ્ગે સુધારશ્મિર્બહિરષ્ટકલાયુતઃ ॥ ૨.૫॥

વર્તતેऽહર્નિશં સોऽપિ સુધાં વર્ષત્યધોમુખઃ ।
તતોऽમૃતં દ્વિધાભૂતં યાતિ સૂક્ષ્મં યથા ચ વૈ ॥ ૨.૬॥

ઇડામાર્ગેણ પુષ્ટ્યર્થં યાતિ મન્દાકિનીજલમ્ ।
પુષ્ણાતિ સકલન્દેહમિડામાર્ગેણ નિશ્ચિતમ્ ॥ ૨.૭॥

એષ પીયૂષરશ્મિર્હિ વામપાર્શ્વે વ્યવસ્થિતઃ ॥ ૨.૮॥

અપરઃ શુદ્ધદુગ્ધાભો હઠાત્કર્ષતિ મણ્ડલાત્ ।
રન્ધ્રમાર્ગેણ સૃષ્ટ્યર્થં મેરૌ સંયાતિ ચન્દ્રમાઃ ॥ ૨.૯॥ (મધ્યમાર્ગેણ)

મેરુમૂલે સ્થિતઃ સૂર્યઃ કલાદ્વાદશસંયુતઃ ।
દક્ષિણે પથિ રશ્મિભિર્વહત્યૂર્ધ્વં પ્રજાપતિઃ ॥ ૨.૧૦॥

પીયૂષરશ્મિનિર્યાસં ધાતૂંશ્ચ ગ્રસતિ ધ્રુવમ્ ।

સમીરમણ્ડલે સૂર્યો ભ્રમતે સર્વવિગ્રહે ॥ ૨.૧૧॥

એષા સૂર્યપરામૂર્તિર્નિર્વાણં દક્ષિણે પથિ ।
વહતે લગ્નયોગેન સૃષ્ટિસંહારકારકઃ ॥ ૨.૧૨॥

સાર્ધલક્ષત્રયં નાડ્યઃ સન્તિ દેહાન્તરે નૃણામ્ ।
પ્રધાનભૂતા નાડ્યસ્તુ તાસુ મુખ્યાશ્ચતુર્દશઃ ॥ ૨.૧૩॥

સુષુમ્ણેડા પિઙ્ગલા ચ ગાન્ધારી હસ્તિજિહ્વિકા ।
કુહૂઃ સરસ્વતી પૂષા શઙ્ખિની ચ પયસ્વની ॥ ૨.૧૪॥

વારુણ્યલમ્બુસા ચૈવ વિશ્વોદરી યશસ્વિની ।
એતાસુ તિસ્રો મુખ્યાઃ સ્યુઃ પિઙ્ગલેડા સુષુમ્ણિકા ॥ ૨.૧૫॥

તિસ્રષ્વેકા સુષુમ્ણૈવ મુખ્યા સા યોગિવલ્લભા । (તિસૃષ્વેકા)
અન્યાસ્તદાશ્રયં કૃત્વા નાડ્યઃ સન્તિ હિ દેહિનામ્ ॥ ૨.૧૬॥

નાડ્યસ્તુ તા અધોવક્ત્રાઃ પદ્મતન્તુનિભાઃ સ્થિતાઃ । (અધોવદનાઃ)
પૃષ્ઠવંશં સમાશ્રિત્ય સોમસૂર્યાગ્નિરૂપિણી ॥ ૨.૧૭॥

તાસાં મધ્યે ગતા નાડી ચિત્રા સા મમ વલ્લભા ।
બ્રહ્મરન્ધ્રં ચ તત્રૈવ સૂક્ષ્માત્સૂક્ષ્મતરં શુભમ્ ॥ ૨.૧૮॥

પઞ્ચવર્ણોજ્જ્વલા શુદ્ધા સુષુમ્ણા મધ્યચારિણી । (મધ્યરૂપિણી)
દેહસ્યોપાધિરૂપા સા સુષુમ્ણા મધ્યરૂપિણી ॥ ૨.૧૯॥ (દેહસ્થોપાધિરૂપા)

દિવ્યમાર્ગમિદં પ્રોક્તમમૃતાનન્દકારકમ્ ।
ધ્યાનમાત્રેણ યોગીન્દ્રો દુરિતૌઘં વિનાશયેત્ ॥ ૨.૨૦॥

ગુદાત્તુદ્વ્યઙ્ગુલાદૂર્ધ્વં મેઢ્રાત્તુ દ્વ્યઙ્ગુલાદધઃ ।
ચતુરઙ્ગગુલવિસ્તારમાધારં વર્તતે સમમ્ ॥ ૨.૨૧॥

તસ્મિન્નાધારપદ્મે ચ કર્ણિકાયાં સુશોભના ।
ત્રિકોણા વર્તતે યોનિઃ સર્વતન્ત્રેષુ ગોપિતા ॥ ૨.૨૨॥

તત્ર વિદ્યુલ્લતાકારા કુણ્ડલી પરદેવતા ।
સાર્દ્ધત્રિકરા કુટિલા સુષુમ્ણામાર્ગસંસ્થિતા ॥ ૨.૨૩॥

જગત્સંસૃષ્ટિરૂપા સા નિર્માણે સતતોદ્યતા ।
વાચામવાચ્યા વાગ્દેવી સદા દેવૈર્નમસ્કૃતા ॥ ૨.૨૪॥ (દેવૈનમસ્કૃતા)

ઇડાનામ્ની તુ યા નાડી વામમાર્ગે વ્યવસ્થિતા ।
સુષુમ્ણાયાં સમાશ્લિષ્ય દક્ષનાસાપુટે ગતા ॥ ૨.૨૫॥

પિઙ્ગલા નામ યા નાડી દક્ષમાર્ગે વ્યવસ્થિતા ।
મધ્યનાડીં સમાશ્લિષ્ય વામનાસાપુટે ગતા ॥ ૨.૨૬॥ (સુષ્મણા સા)

ઇડાપિઙ્ગલયોર્મધ્યે સુષુમ્ણા યા ભવેત્ખલુ ।
ષટ્સ્થાનેષુ ચ ષટ્શક્તિં ષટ્પદ્મં યોગિનો વિદુઃ ॥ ૨.૨૭॥

પઞ્ચસ્થાનં સુષુમ્ણાયા નામાનિ સ્યુર્બહૂનિ ચ ।
પ્રયોજનવશાત્તાનિ જ્ઞાતવ્યાનીહ શાસ્ત્રતઃ ॥ ૨.૨૮॥

અન્યા યાઽસ્ત્યપરા નાડી મૂલાધારાત્સમુત્થિતા ।
રસનામેઢ્રનયનં પાદાઙ્ગુષ્ઠે ચ શ્રોત્રકમ્ ॥ ૨.૨૯॥

કુક્ષિકક્ષાઙ્ગુષ્ઠકર્ણં સર્વાઙ્ગં પાયુકુક્ષિકમ્ ।
લબ્ધ્વા તાં વૈ નિવર્તન્તે યથાદેશસમુદ્ભવાઃ ॥ ૨.૩૦॥ (લબ્ધાન્તા)

એતાભ્ય એવ નાડીભ્યઃ શાખોપશાખતઃ ક્રમાત્ ।
સાર્ધં લક્ષત્રયં જાતં યથાભાગં વ્યવસ્થિતમ્ ॥ ૨.૩૧॥ (સાર્ધલક્ષત્રયં)

એતા ભોગવહા નાડ્યો વાયુસઞ્ચારદક્ષકાઃ ।
ઓતપ્રોતાભિસંવ્યાપ્ય તિષ્ઠન્ત્યસ્મિન્કલેવરે ॥ ૨.૩૨॥ (ઓતપ્રોત્રાઃ સુસંવ્યાપ્ય)

સૂર્યમણ્ડલમધ્યસ્થઃ કલાદ્વાદશસંયુતઃ ।
વસ્તિદેશે જ્વલદ્વહ્નિર્વર્તતે ચાન્નપાચકઃ ॥ ૨.૩૩॥ (બસ્તિદેશે)

એષ વૈશ્વાનરોઽગ્નિર્વૈ મમ તેજોંશસમ્ભવઃ । (વૈશ્વાનરાગ્નિરેષો વૈ)
કરોતિ વિવિધં પાકં પ્રાણિનાં દેહમાસ્થિતઃ ॥ ૨.૩૪॥

આયુઃ પ્રદાયકો વહ્નિર્બલં પુષ્ટિં દદાતિ સઃ ।
શરીરપાટવઞ્ચાપિ ધ્વસ્તરોગસમુદ્ભવઃ ॥ ૨.૩૫॥ (શરીર પાટવં ચારિ)

તસ્માદ્વૈશ્વાનરાગ્નિઞ્ચ પ્રજ્વાલ્ય વિધિવત્સુધીઃ ।
તસ્મિન્નન્નં હુનેદ્યોગી પ્રત્યહં ગુરુશિક્ષયા ॥ ૨.૩૬॥

બ્રહ્માણ્ડસંજ્ઞકે દેહે સ્થાનાનિ સ્યુર્બહૂનિ ચ ।
મયોક્તાનિ પ્રધાનાનિ જ્ઞાતવ્યાનીહ શાસ્ત્રકે ॥ ૨.૩૭॥

નાનાપ્રકારનામાનિ સ્થાનાનિ વિવિધાનિ ચ ।
વર્તન્તે વિગ્રહે તાનિ કથિતું નૈવ શક્યતે ॥ ૨.૩૮॥

ઇત્થં પ્રકલ્પિતે દેહે જીવો વસતિ સર્વગઃ ।
અનાદિવાસનામાલાઽલઙ્કૃતઃ કર્મશ‌ૃઙ્ખલઃ ॥ ૨.૩૯॥

નાનાવિધગુણોપેતઃ સર્વવ્યાપારકારકઃ ।
પૂર્વાર્જિતાનિ કર્માણિ ભુનક્તિ વિવિધાનિ ચ ॥ ૨.૪૦॥

યદ્યત્સન્દૃશ્યતે લોકે સર્વં તત્કર્મસમ્ભવમ્ ।
સર્વા કર્માનુસારેણ જન્તુર્ભોગાન્ભુનક્તિ વૈ ॥ ૨.૪૧॥ (સર્વઃ)

યે યે કામાદયો દોષાઃ સુખદુઃખપ્રદાયકાઃ ।
તે તે સર્વે પ્રવર્તન્તે જીવકર્માનુસારતઃ ॥ ૨.૪૨॥

પુણ્યોપરક્તચૈતન્યે પ્રાણાન્પ્રીણાતિ કેવલમ્ ।
બાહ્યે પુણ્યમયં પ્રાપ્ય ભોજ્યવસ્તુ સ્વયમ્ભવેત્ ॥ ૨.૪૩॥

તતઃ કર્મબલાત્પુંસઃ સુખં વા દુઃખમેવ ચ ।
પાપોપરક્તચૈતન્યં નૈવ તિષ્ઠતિ નિશ્ચિતમ્ ॥ ૨.૪૪॥

ન તદ્ભિન્નો ભવેત્સોઽપિ તદ્ભિન્નો ન તુ કિઞ્ચન ।
માયોપહિતચૈતન્યાત્સર્વં વસ્તુ પ્રજાયતે ॥ ૨.૪૫॥

યથાકાલેઽપિ ભોગાય જન્તૂનાં વિવિધોદ્ભવઃ । (યથાકાલેપિ)
યથા દોષવશાચ્છુક્તૌ રજતારોપણં ભવેત્ ।
તથા સ્વકર્મદોષાદ્વૈ બ્રહ્મણ્યારોપ્યતે જગત્ ॥ ૨.૪૬॥

સ વાસનાભ્રમોત્પન્નોન્મૂલનાતિસમર્થનમ્ ।
ઉત્પન્નઞ્ચેદીદૃશં સ્યાજ્જ્ઞાનં મોક્ષપ્રસાધનમ્ ॥ ૨.૪૭॥

સાક્ષાદ્વૈશેષદૃષ્ટિસ્તુ સાક્ષાત્કારિણિ વિભ્રમે ।
કારણં નાન્યથા યુક્ત્યા સત્યં સત્યં મયોદિતમ્ ॥ ૨.૪૮॥

સાક્ષાત્કારિભ્રમે સાક્ષાત્સાક્ષાત્કારિણિ નાશયેત્ ।
સ હિ નાસ્તીતિ સંસારે ભ્રમો નૈવ નિવર્તતે ॥ ૨.૪૯॥ (સો)

મિથ્યાજ્ઞાનનિવૃત્તિસ્તુ વિશેષદર્શનાદ્ભવેત્ ।
અન્યથા ન નિવૃત્તિઃ સ્યાદૃશ્યતે રજતભ્રમઃ ॥ ૨.૫૦॥ (સ્યાદૃશ્યે)

યાવન્નોત્પદ્યતે જ્ઞાનં સાક્ષાત્કારે નિરઞ્જને ।
તાવત્સર્વાણિ ભૂતાનિ દૃશ્યન્તે વિવિધાનિ ચ ॥ ૨.૫૧॥

યદા કર્માર્જિતં દેહં નિર્વાણે સાધનં ભવેત્ ।
તદા શરીરવહનં સફલં સ્યાન્ન ચાન્યથા ॥ ૨.૫૨॥

યાદૃશી વાસના મૂલા વર્તતે જીવસઙ્ગિની । (વર્ત્તતે)
તાદૃશં વહતે જન્તુઃ કૃત્યાકૃત્યવિધૌ ભ્રમમ્ ॥ ૨.૫૩॥

સંસારસાગરં તર્તું યદીચ્છેદ્યોગસાધકઃ ।
કૃત્વા વર્ણાશ્રમં કર્મ ફલવર્જં તદાચરેત્ ॥ ૨.૫૪॥

વિષયાસક્તપુરુષા વિષયેષુ સુખેપ્સવઃ ।
વાચાભિરુદ્ધનિર્વાણા વર્તન્તે પાપકર્મણિ ॥ ૨.૫૫॥

આત્માનમાત્મના પશ્યન્ન કિઞ્ચિદિહ પશ્યતિ ।
તદા કર્મપરિત્યાગે ન દોષોઽસ્તિ મતં મમ ॥ ૨.૫૬॥

કામાદયો વિલીયન્તે જ્ઞાનાદેવ ન ચાન્યથા ।
અભાવે સર્વતત્ત્વાનાં સ્વયં તત્ત્વં પ્રકાશતે ॥ ૨.૫૭॥

ઇતિ શ્રીશિવસંહિતાયાં હરગૌરીસંવાદે યોગશાસ્ત્રે
યોગપ્રકથને તત્ત્વજ્ઞાનોપદેશો નામ દ્વિતીયઃ પટલઃ સમાપ્તઃ । ૨।

## તૃતીયપટલઃ

અથ યોગાનુષ્ઠાનપદ્ધતિર્યોગાભ્યાસવર્ણનમ્ ।
હૃદ્યસ્તિ પઙ્કજં દિવ્યં દિવ્યલિઙ્ગેન ભૂષિતમ્ । (હૃદયસ્તિ)
કાદિઠાન્તાક્ષરોપેતં દ્વાદશાર્ણવિભૂષિતમ્ ॥ ૩.૧॥

પ્રાણો વસતિ તત્રૈવ વાસનાભિરલઙ્કૃતઃ ।
અનાદિકર્મસંશ્લિષ્ટઃ પ્રાપ્યાહઙ્કારસંયુતઃ ॥ ૩.૨॥

પ્રાણસ્ય વૃત્તિભેદેન નામાનિ વિવિધાનિ ચ ।
વર્તન્તે તાનિ સર્વાણિ કથિતું નૈવ શક્યતે ॥ ૩.૩॥

પ્રાણોઽપાનઃ સમાનશ્ચોદાનો વ્યાનશ્ચ પઞ્ચમઃ ।
નાગઃ કૂર્મશ્ચ કૃકલો દેવદત્તો ધનઞ્જયઃ ॥ ૩.૪॥ (કૃકરો)

દશ નામાનિ મુખ્યાનિ મયોક્તાનીહ શાસ્ત્રકે ।
કુર્વન્તિ તેઽત્ર કાર્યાણિ પ્રેરિતાનિ સ્વકર્મભિઃ ॥ ૩.૫॥

અત્રાપિ વાયવઃ પઞ્ચ મુખ્યાઃ સ્યુર્દશતઃ પુનઃ । (સ્યુર્દર્શિતાઃ)

તત્રાપિ શ્રેષ્ઠકર્તારૌ પ્રાણાપાનૌ મયોદિતૌ ॥ ૩.૬॥ (શ્રેષ્ઠકર્ત્તારૌ)

હૃદિ પ્રાણો ગુદેઽપાનઃ સમાનો નાભિમણ્ડલે ।
ઉદાનઃ કણ્ઠદેશસ્થો વ્યાનઃ સર્વશરીરગઃ ॥ ૩.૭॥

નાગાદિવાયવઃ પઞ્ચ તે કુર્વન્તિ ચ વિગ્રહે ।
ઉદ્ગારોન્મીલનં ક્ષુતૃડ્જૃમ્ભા હિક્કા ચ પઞ્ચમઃ ॥ ૩.૮॥

અનેન વિધિના યો વૈ બ્રહ્માણ્ડં વેત્તિ વિગ્રહમ્ ।
સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ॥ ૩.૯॥

અધુના કથયિષ્યામિ ક્ષિપ્રં યોગસ્ય સિદ્ધયે ।
યજ્જ્ઞાત્વા નાવસીદન્તિ યોગિનો યોગસાધને ॥ ૩.૧૦॥

ભવેદ્વીર્યવતી વિદ્યા ગુરુવક્ત્રસમુદ્ભવા ।
અન્યથા ફલહીના સ્યાન્નિર્વીર્યાપ્યતિદુઃખદા ॥ ૩.૧૧॥

ગુરું સન્તોષ્ય યત્નેન યે વૈ વિદ્યામુપાસતે ।
અવલમ્બેન વિદ્યાયાસ્તસ્યાઃ ફલમવાપ્નુયાત્ ॥ ૩.૧૨॥ (ફલમવાપ્નુયુઃ)

ગુરુઃ પિતા ગુરુર્માતા ગુરુર્દેવો ન સંશયઃ ।
કર્મણા મનસા વાચા તસ્માત્સર્વૈઃ પ્રસેવ્યતે ॥ ૩.૧૩॥

ગુરુપ્રસાદતઃ સર્વં લભ્યતે શુભમાત્મનઃ ।
તસ્માત્સેવ્યો ગુરુર્નિત્યમન્યથા ન શુભં ભવેત્ ॥ ૩.૧૪॥

પ્રદક્ષિણાત્રયં કૃત્વા સ્પૃષ્ટ્વા સવ્યેન પાણિના ।
અષ્ટાઙ્ગેન નમસ્કુર્યાદ્ગુરુપાદસરોરુહમ્ ॥ ૩.૧૫॥

શ્રદ્ધયાત્મવતાં પુંસાં સિદ્ધિર્ભવતિ નિશ્ચિતા । (નાન્યથા)
અન્યેષાઞ્ચ ન સિદ્ધિઃ સ્યાત્તસ્માદ્યત્નેન સાધયેત્ ॥ ૩.૧૬॥

ન ભવેત્સઙ્ગયુક્તાનાં તથાઽવિશ્વાસિનામપિ ।
ગુરુપૂજાવિહીનાનાં તથા ચ બહુસઙ્ગિનામ્ ॥ ૩.૧૭॥

મિથ્યાવાદરતાનાં ચ તથા નિષ્ઠુરભાષિણામ્ ।
ગુરુસન્તોષહીનાનાં ન સિદ્ધિઃ સ્યાત્કદાચન ॥ ૩.૧૮॥

ફલિષ્યતીતિ વિશ્વાસઃ સિદ્ધેઃ પ્રથમલક્ષણમ્ ।
દ્વિતીયં શ્રદ્ધયા યુક્તં તૃતીયં ગુરુપૂજનમ્ ॥ ૩.૧૯॥

ચતુર્થં સમતાભાવં પઞ્ચમેન્દ્રિયનિગ્રહમ્ ।
ષષ્ઠં ચ પ્રમિતાહારં સપ્તમં નૈવ વિદ્યતે ॥ ૩.૨૦॥

યોગોપદેશં સમ્પ્રાપ્ય લબ્ધ્વા યોગવિદં ગુરુમ્ ।
ગુરૂપદિષ્ટવિધિના ધિયા નિશ્ચિત્ય સાધયેત્ ॥ ૩.૨૧॥

સુશોભને મઠે યોગી પદ્માસનસમન્વિતઃ ।
આસનોપરિ સંવિશ્ય પવનાભ્યાસમાચરેત્ ॥ ૩.૨૨॥

સમકાયઃ પ્રાઞ્જલિશ્ચ પ્રણમ્ય ચ ગુરૂન્ સુધીઃ ।
દક્ષે વામે ચ વિઘ્નેશં ક્ષેત્રપાલામ્બિકાં પુનઃ ॥ ૩.૨૩॥

તતશ્ચ દક્ષાઙ્ગુષ્ઠેન નિરુદ્ધ્ય પિઙ્ગલાં સુધીઃ ।
ઇડયા પૂરયેદ્વાયું યથાશક્ત્યા તુ કુમ્ભયેત્ ॥ ૩.૨૪॥

તતસ્ત્યક્ત્વા પિઙ્ગલયાશનૈરેવ ન વેગતઃ ।
પુનઃ પિઙ્ગલયાપૂર્ય યથાશક્ત્યા તુ કુમ્ભયેત્ ॥ ૩.૨૫॥ (યથાશક્તિ)

ઇડયા રેચયેદ્વાયું ન વેગેન શનૈઃ શનૈઃ ।
ઇદં યોગવિધાનેન કુર્યાદ્વિંશતિકુમ્ભકાન્ ।
સર્વદ્વન્દ્વવિનિર્મુક્તઃ પ્રત્યહં વિગતાલસઃ ॥ ૩.૨૬॥

પ્રાતઃકાલે ચ મધ્યાહ્ને સૂર્યાસ્તે ચાર્દ્ધરાત્રકે ।
કુર્યાદેવં ચતુર્વારં કાલેષ્વેતેષુ કુમ્ભકાન્ ॥ ૩.૨૭॥

ઇત્થં માસત્રયં કુર્યાદનાલસ્યો દિને દિને । (માસદ્વયં)
તતો નાડીવિશુદ્ધિઃ સ્યાદવિલમ્બેન નિશ્ચિતમ્ ॥ ૩.૨૮॥

યદા તુ નાડીશુદ્ધિઃ સ્યાદ્યોગિનસ્તત્ત્વદર્શિનઃ ।
તદા વિધ્વસ્તદોષશ્ચ ભવેદારમ્ભસમ્ભવઃ ॥ ૩.૨૯॥

ચિહ્નાનિ યોગિનો દેહે દૃશ્યન્તે નાડિશુદ્ધિતઃ ।
કથ્યન્તે તુ સમસ્તાન્યઙ્ગાનિ સઙ્ક્ષેપતો મયા ॥ ૩.૩૦॥

સમકાયઃ સુગન્ધિશ્ચ સુકાન્તિઃ સ્વરસાધકઃ ॥ ૩.૩૧॥

આરમ્ભઘટકશ્ચૈવ યથા પરિચયસ્તદા ।
નિષ્પત્તિઃ સર્વયોગેષુ યોગાવસ્થા ભવન્તિ તાઃ ॥ ૩.૩૨॥

આરમ્ભઃ કથિતોઽસ્માભિરધુના વાયુસિદ્ધયે ।
અપરઃ કથ્યતે પશ્ચાત્ સર્વદુઃખૌઘનાશનઃ ॥ ૩.૩૩॥

પ્રૌઢવહ્નિઃ સુભોગી ચ સુખીસર્વાઙ્ગસુન્દરઃ ।
સમ્પૂર્ણહૃદયો યોગી સર્વોત્સાહબલાન્વિતઃ ।
જાયતે યોગિનોઽવશ્યમેતત્સર્વં કલેવરે ॥ ૩.૩૪॥ (યોગિનોઽવશ્યમેતે સર્વકલેવરે)

અથ વર્જ્યં પ્રવક્ષ્યામિ યોગવિઘ્નકરં પરમ્ ।
યેન સંસારદુઃખાબ્ધિં તીર્ત્વા યાસ્યન્તિ યોગિન ॥ ૩.૩૫॥

આમ્લં રૂક્ષં તથા તીક્ષ્ણં લવણં સાર્ષપં કટુમ્ । (કક્ષં)
બહુલં ભ્રમણં પ્રાતઃ સ્નાનં તૈલવિદાહકમ્ ॥ ૩.૩૬॥

સ્તેયં હિંસાં જનદ્વેષઞ્ચાહઙ્કારમનાર્જવમ્ ।
ઉપવાસમસત્યઞ્ચ મોહઞ્ચ પ્રાણિપીડનમ્ ॥ ૩.૩૭॥ (મોક્ષઞ્ચ)

સ્ત્રીસઙ્ગમગ્નિસેવાં ચ બહ્વાલાપં પ્રિયાપ્રિયમ્ ।
અતીવ ભોજનં યોગી ત્યજેદેતાનિ નિશ્ચિતમ્ ॥ ૩.૩૮॥

ઉપાયં ચ પ્રવક્ષ્યામિ ક્ષિપ્રં યોગસ્ય સિદ્ધયે ।
ગોપનીયં સાધકાનાં યેન સિદ્ધિર્ભવેત્ખલુ ॥ ૩.૩૯॥

ઘૃતં ક્ષીરં ચ મિષ્ટાન્નં તામ્બૂલં ચૂર્ણવર્જિતમ્ ।
કર્પૂરં નિષ્ઠુરં મિષ્ટં સુમઠં સૂક્ષ્મરન્ધ્રકમ્ ॥ ૩.૪૦॥ (નિસ્તુષં) (સૂક્ષ્મવસ્ત્રકમ્)

સિદ્ધાન્તશ્રવણં નિત્યં વૈરાગ્યગૃહસેવનમ્ ।
નામસઙ્કીર્તનં વિષ્ણોઃ સુનાદશ્રવણં પરમ્ ॥ ૩.૪૧॥ (સુસાદશ્રવણે)

ધૃતિઃ ક્ષમા તપઃ શૌચં હ્રીર્મતિર્ગુરુસેવનમ્ ।
સદૈતાનિ પરં યોગી નિયમાનિ સમાચરેત્ ॥ ૩.૪૨॥ (સદૈતાંશ્ચ) (નિયમાંશ્ચ)

અનિલેઽર્કપ્રવેશે ચ ભોક્તવ્યં યોગિભિઃ સદા ।
વાયૌ પ્રવિષ્ટે શશિનિ શયનં સાધકોત્તમૈઃ ॥ ૩.૪૩॥

સદ્યો ભુક્તેઽપિ ક્ષુધિતે નાભ્યાસઃ ક્રિયતે બુધૈઃ ।
અભ્યાસકાલે પ્રથમં કુર્યાત્ક્ષીરાજ્યભોજનમ્ ॥ ૩.૪૪॥

તતોઽભ્યાસે સ્થિરીભૂતે ન તાદૃઙ્નિયમગ્રહઃ ।
અભ્યાસિના વિભોક્તવ્યં સ્તોકં સ્તોકમનેકધા ॥ ૩.૪૫॥

પૂર્વોક્તકાલે કુર્યાત્તુ કુમ્ભકાન્પ્રતિવાસરે ।
તતો યથેષ્ટા શક્તિઃ સ્યાદ્યોગિનો વાયુધારણે ॥ ૩.૪૬॥

યથેષ્ટં ધારણાદ્વાયોઃ કુમ્ભકઃ સિધ્યતિ ધ્રુવમ્ ।
કેવલે કુમ્ભકે સિદ્ધે કિં ન સ્યાદિહ યોગિનઃ ॥ ૩.૪૭॥

સ્વેદઃ સઞ્જાયતે દેહે યોગિનઃ પ્રથમોદ્યમે ॥ ૩.૪૮॥

યદા સઞ્જાયતે સ્વેદો મર્દનં કારયેત્સુધીઃ ।
અન્યથા વિગ્રહે ધાતુર્નષ્ટો ભવતિ યોગિનઃ ॥ ૩.૪૯॥

દ્વિતીયે હિ ભવેત્કમ્પો દાર્દુરી મધ્યમે મતઃ । (મતા)
તતોઽધિકતરાભ્યાસાદ્ગગનેચરસાધકઃ ॥ ૩.૫૦॥

યોગી પદ્માસનસ્થોઽપિ ભુવમુત્સૃજ્ય વર્તતે ।
વાયુસિદ્ધિસ્તદા જ્ઞેયા સંસારધ્વાન્તનાશિની ॥ ૩.૫૧॥

તાવત્કાલં પ્રકુર્વીત યોગોક્તનિયમગ્રહમ્ ।
અલ્પનિદ્રા પુરીષં ચ સ્તોકં મૂત્રં ચ જાયતે ॥ ૩.૫૨॥

અરોગિત્વમદીનત્વં યોગિનસ્તત્ત્વદર્શિનઃ ।
સ્વેદો લાલા કૃમિશ્ચૈવ સર્વથૈવ ન જાયતે ॥ ૩.૫૩॥

કફપિત્તાનિલાશ્ચૈવ સાધકસ્ય કલેવરે ।
તસ્મિન્કાલે સાધકસ્ય ભોજ્યેષ્વનિયમગ્રહઃ ॥ ૩.૫૪॥

અત્યલ્પં બહુધા ભુક્ત્વા યોગી ન વ્યથતે હિ સઃ ।
અથાભ્યાસવશાદ્યોગી ભૂચરીં સિદ્ધિમાપ્નુયાત્ ।
યથા દર્દુરજન્તૂનાં ગતિઃ સ્યાત્પાણિતાડનાત્ ॥ ૩.૫૫॥

સન્ત્યત્ર બહવો વિઘ્ના દારુણા દુર્નિવારણાઃ ।
તથાપિ સાધયેદ્યોગી પ્રાણૈઃ કણ્ઠગતૈરપિ ॥ ૩.૫૬॥

તતો રહસ્યુપાવિષ્ટઃ સાધકઃ સંયતેન્દ્રિયઃ ।
પ્રણવં પ્રજપેદ્દીર્ઘં વિઘ્નાનાં નાશહેતવે ॥ ૩.૫૭॥

પૂર્વાર્જિતાનિ કર્માણિ પ્રાણાયામેન નિશ્ચિતમ્ ।
નાશયેત્સાધકો ધીમાનિહલોકોદ્ભવાનિ ચ ॥ ૩.૫૮॥

પૂર્વાજિતાનિ પાપાનિ પુણ્યાનિ વિવિધાનિ ચ ।
નાશયેત્ષોડશપ્રાણાયામેન યોગિ પુઙ્ગવઃ ॥ ૩.૫૯॥

પાપતૂલચયાનાહો પ્રલયેત્પ્રલયાગ્નિના । (પ્રદહેત્પ્રલયાગ્નિના)
તતઃ પાપવિનિર્મુક્તઃ પશ્ચાત્પુણ્યાનિ નાશયેત્ ॥ ૩.૬૦॥

પ્રાણાયામેન યોગીન્દ્રો લબ્ધ્વૈશ્વર્યાષ્ટકાનિ વૈ ।
પાપપુણ્યોદધિં તીર્ત્વા ત્રૈલોક્યચરતામિયાત્ ॥ ૩.૬૧॥

તતોઽભ્યાસક્રમેણૈવ ઘટિકાત્રિતયં ભવેત્ ।
યેન સ્યાત્સકલાસિદ્ધિર્યોગિનઃ સ્વેપ્સિતા ધ્રુવમ્ ॥ ૩.૬૨॥

વાક્સિધિઃ કામચારિત્વં દૂરદૃષ્ટિસ્તથૈવ ચ ।
દૂરશ્રુતિઃ સૂક્ષ્મદૃષ્ટિઃ પરકાયપ્રવેશનમ્ ॥ ૩.૬૩॥

વિણ્મૂત્રલેપને સ્વર્ણમદૃશ્યકરણં તથા ।
ભવન્ત્યેતાનિ સર્વાણિ ખેચરત્વં ચ યોગિનામ્ ॥ ૩.૬૪॥

યદા ભવેદ્ઘટાવસ્થા પવનાભ્યાસને પરા ।
તદા સંસારચક્રેઽસ્મિન્નાસ્તિ યન્ન સાધયેત્ ॥ ૩.૬૫॥ (સધારયેત્)

પ્રાણાપાનનાદબિન્દુ જીવાત્મપરમાત્મનઃ ।
(પ્રાણાપાનનાદબિન્દૂ જીવાત્મપરમાત્મનોઃ)
મિલિત્વા ઘટતે યસ્માત્તસ્માદ્વૈ ઘટ ઉચ્યતે ॥ ૩.૬૬॥

યામમાત્રં યદા ધર્તું સમર્થઃ સ્યાત્તદાદ્ભુતઃ ।
પ્રત્યાહારસ્તદૈવ સ્યાન્નાન્તરા ભવતિ ધ્રુવમ્ ॥ ૩.૬૭॥

યં યં જાનાતિ યોગીન્દ્રસ્તં તમાત્મેતિ ભાવયેત્ ।
યૈરિન્દ્રિયૈર્યદ્વિધાનસ્તદિન્દ્રિયજયો ભવેત્ ॥ ૩.૬૮॥

યામમાત્રં યદા પૂર્ણં ભવેદભ્યાસયોગતઃ ।
એકવારં પ્રકુર્વીત તદા યોગી ચ કુમ્ભકમ્ ॥ ૩.૬૯॥ (પ્રકુર્તીત)

દણ્ડાષ્ટકં યદા વાયુર્નિશ્ચલો યોગિનો ભવેત્ ।
સ્વસામર્થ્યાત્તદાઙ્ગુષ્ઠે તિષ્ઠેદ્વાતુલવત્સુધીઃ ॥ ૩.૭૦॥

તતઃ પરિચયાવસ્થા યોગિનોઽભ્યાસતો ભવેત્ ।
યદા વાયુશ્ચન્દ્રસૂર્યં ત્યક્ત્વા તિષ્ઠતિ નિશ્ચલમ્ ।
વાયુઃ પરિચિતો વાયુઃ સુષુમ્ણા વ્યોમ્નિ સઞ્ચરેત્ ॥ ૩.૭૧॥ (સુષુમ્ના)

ક્રિયાશક્તિં ગૃહીત્વૈવ ચક્રાન્ભિત્ત્વા સુનિશ્ચિતમ્ ॥ ૩.૭૨॥

યદા પરિચયાવસ્થા ભવેદભ્યાસયોગતઃ ।
ત્રિકૂટં કર્મણાં યોગી તદા પશ્યતિ નિશ્ચિતમ્ ॥ ૩.૭૩॥

તતશ્ચ કર્મકૂટાનિ પ્રણવેન વિનાશયેત્ ।
સ યોગી કર્મભોગાય કાયવ્યૂહં સમાચરેત્ ॥ ૩.૭૪॥

અસ્મિન્કાલે મહાયોગી પઞ્ચધા ધારણં ચરેત્ ।
યેન ભૂરાદિસિદ્ધિઃ સ્યાત્તતો ભૂતભયાપહા ॥ ૩.૭૫॥

આધારે ઘટિકાઃ પઞ્ચ લિઙ્ગસ્થાને તથૈવ ચ ।
તદૂર્ધ્વં ઘટિકાઃ પઞ્ચ નાભિહૃન્મધ્યકે તથા ॥ ૩.૭૬॥

ભ્રૂમધ્યોર્ધ્વં તથા પઞ્ચ ઘટિકા ધારયેત્સુધીઃ ।
તથા ભૂરાદિના નષ્ટો યોગીન્દ્રો ન ભવેત્ખલુ ॥ ૩.૭૭॥

મેધાવી સર્વભૂતાનાં ધારણાં યઃ સમભ્યસેત્ ।
શતબ્રહ્મમૃતેનાપિ મૃત્યુસ્તસ્ય ન વિદ્યતે ॥ ૩.૭૮॥

તતોઽભ્યાસક્રમેણૈવ નિષ્પત્તિર્યોગિનો ભવેત્ ।
અનાદિકર્મબીજાનિ યેન તીર્ત્વાઽમૃતં પિબેત્ ॥ ૩.૭૯॥

યદા નિષ્પત્તિર્ભવતિ સમાધેઃ સ્વેનકર્મણા ।
જીવન્મુક્તસ્ય શાન્તસ્ય ભવેદ્ધીરસ્ય યોગિનઃ ॥ ૩.૮૦॥

યદા નિષ્પત્તિસમ્પન્નઃ સમાધિઃ સ્વેચ્છયા ભવેત્ ॥ ૩.૮૧॥

ગૃહીત્વા ચેતનાં વાયુઃ ક્રિયાશક્તિં ચ વેગવાન્ ।
સર્વાન્ચક્રાન્વિજિત્વા ચ જ્ઞાનશક્તૌ વિલીયતે ॥ ૩.૮૨॥ (સર્વાંશ્ચક્રાન્વિજિત્વા)

ઇદાનીં ક્લેશહાન્યર્થં વક્તવ્યં વાયુસાધનમ્ ।
યેન સંસારચક્રેઽસ્મિન્ રોગહાનિર્ભવેદ્ધ્રુવમ્ ॥ ૩.૮૩॥ (સંસારચક્રેસ્મિન્)

રસનાં તાલુમૂલે યઃ સ્થાપયિત્વા વિચક્ષણઃ ।
પિબેત્પ્રાણાનિલં તસ્ય રોગાણાં સઙ્ક્ષયો ભવેત્ ॥ ૩.૮૪॥

કાકચઞ્ચ્વા પિબેદ્વાયું શીતલં યો વિચક્ષણઃ ।
પ્રાણાપાનવિધાનજ્ઞઃ સ ભવેન્મુક્તિભાજનઃ ॥ ૩.૮૫॥

સરસં યઃ પિબેદ્વાયું પ્રત્યહં વિધિના સુધીઃ ।
નશ્યન્તિ યોગિનસ્તસ્ય શ્રમદાહજરામયાઃ ॥ ૩.૮૬॥

રસનામૂર્ધ્વગાં કૃત્વા યશ્ચન્દ્રે સલિલં પિબેત્ ।
માસમાત્રેણ યોગીન્દ્રો મૃત્યુઞ્જયતિ નિશ્ચિતમ્ ॥ ૩.૮૭॥

રાજદન્તબિલં ગાઢં સમ્પીડ્ય વિધિના પિબેત્ ।
ધ્યાત્વા કુણ્ડલિનીં દેવીં ષણ્માસેન કવિર્ભવેત્ ॥ ૩.૮૮॥

કાકચઞ્ચ્વા પિબેદ્વાયું સન્ધ્યયોરુભયોરપિ ।
કુણ્ડલિન્યા મુખે ધ્યાત્વા ક્ષયરોગસ્ય શાન્તયે ॥ ૩.૮૯॥

અહર્નિશં પિબેદ્યોગી કાકચઞ્ચ્વા વિચક્ષણઃ ।
પિબેત્પ્રાણાનિલં તસ્ય રોગાણાં સઙ્ક્ષયો ભવેત્ । (રોગાનાં)
દૂરશ્રુતિર્દૂરદૃષ્ટિસ્તથા સ્યાદ્દર્શનં ખલુ ॥ ૩.૯૦॥

દન્તૈર્દન્તાન્સમાપીડ્ય પિબેદ્વાયું શનૈઃ શનૈઃ । (દન્તેદન્તાન્સમાપીડ્ય)
ઊર્ધ્વજિહ્વઃ સુમેધાવી મૃત્યુઞ્જયતિ સોઽચિરાત્ ॥ ૩.૯૧॥ (મૃત્યું જયતિ સોચિરાત્)

ષણ્માસમાત્રમભ્યાસં યઃ કરોતિ દિને દિને ।
સર્વપાપવિનિર્મુક્તો રોગાન્નાશયતે હિ સઃ ॥ ૩.૯૨॥

સંવત્સરકૃતાભ્યાસાન્મૃત્યુઞ્જયતિ જયતિ નિશ્ચિતમ્ ।
(સંવત્સરકૃતાભ્યાસાદ્ભૈરવો ભવતિ ધ્રુવમ્ ।)
તસ્માદતિપ્રયત્નેન સાધયેદ્યોગસાધકઃ ॥ ૩.૯૩॥

વર્ષત્રયકૃતાભ્યાસાદ્ભૈરવો ભવતિ ધ્રુવમ્ ।
અણિમાદિગુણાન્લબ્ધ્વા જિતભૂતગણઃ સ્વયમ્ ॥ ૩.૯૪॥

રસનામૂર્ધ્વગાં કૃત્વા ક્ષણાર્ધં યદિ તિષ્ઠતિ । (રસનામૂર્દ્ધગાં)
ક્ષણેન મુચ્યતે યોગી વ્યાધિમૃત્યુજરાદિભિઃ ॥ ૩.૯૫॥

રસનાં પ્રાણસંયુક્તાં પીડ્યમાનાં વિચિન્તયેત્ ।
ન તસ્ય જાયતે મૃત્યુઃ સત્યં સત્યં મયોદિતમ્ ॥ ૩.૯૬॥

એવમભ્યાસયોગેન કામદેવો દ્વિતીયકઃ ।
ન ક્ષુધા ન તૃષા નિદ્રા નૈવ મૂર્ચ્છા પ્રજાયતે ॥ ૩.૯૭॥

અનેનૈવ વિધાનેન યોગીન્દ્રોઽવનિમણ્ડલે ।
ભવેત્સ્વચ્છન્દચારી ચ સર્વાપત્પરિવર્જિતઃ ॥ ૩.૯૮॥

ન તસ્ય પુનરાવૃત્તિર્મોદતે સસુરૈરપિ ।
પુણ્યપાપૈર્ન લિપ્યેત એતદાચરેણન સઃ ॥ ૩.૯૯॥ (એતદાક્ષરણેન)

ચતુરશીત્યાસનાનિ સન્તિ નાનાવિધાનિ ચ ।
તેભ્યશ્ચતુષ્કમાદાય મયોક્તાનિ બ્રવીમ્યહમ્ ।

સિદ્ધાસનં તતઃ પદ્માસનઞ્ચોગ્રં ચ સ્વસ્તિકમ્ ॥ ૩.૧૦૦॥

સિદ્ધાસનકથનમ્ ।

યોનિં સમ્પીડ્ય યત્નેન પાદમૂલેન સાધકઃ ।
મેઢ્રોપરિ પાદમૂલં વિન્યસેદ્યોગવિત્સદા ॥ ૩.૧૦૧॥

ઊર્ધ્વં નિરીક્ષ્ય ભ્રૂમધ્યં નિશ્ચલઃ સંયતેન્દ્રિયઃ ।
વિશેષોઽવક્રકાયશ્ચ રહસ્યુદ્વેગવર્જિતઃ ॥ ૩.૧૦૨॥

એતત્સિદ્ધાસનં જ્ઞેયં સિદ્ધાનાં સિદ્ધિદાયકમ્ ।
યેનાભ્યાસવશાચ્છીઘ્રં યોગનિષ્પત્તિમાપ્નુયાત્ ॥ ૩.૧૦૩॥

સિદ્ધાસનં સદાસેવ્યં પવનાભ્યાસિના પરમ્ ।
યેન સંસારમુત્સૃજ્ય લભતે પરમાં ગતિમ્ ॥ ૩.૧૦૪॥

નાતઃ પરતરં ગુહ્યમાસનં વિદ્યતે ભુવિ ।
યેનાનુધ્યાનમાત્રેણ યોગી પાપાદ્વિમુચ્યતે ॥ ૩.૧૦૫॥

પદ્માસનકથનમ્ ।

ઉત્તાનૌ ચરણૌ કૃત્વા ઊરુસંસ્થૌ પ્રયત્નતઃ ।
ઊરુમધ્યે તથોત્તાનૌ પાણી કૃત્વા તુ તાદૃશૌ ॥ ૩.૧૦૬॥

નાસાગ્રે વિન્યસેદૃષ્ટિં દન્તમૂલઞ્ચ જિહ્વયા ।
ઉત્તોલ્ય ચિબુકં વક્ષ ઉત્થાપ્ય પવનં શનૈઃ ॥ ૩.૧૦૭॥

યથાશક્ત્યા સમાકૃષ્ય પૂરયેદુદરં શનૈઃ ।
યથા શક્ત્યૈવ પશ્ચાત્તુ રેચયેદવિરોધતઃ ॥ ૩.૧૦૮॥

ઇદં પદ્માસનં પ્રોક્તં સર્વવ્યાધિવિનાશનમ્ ।
દુર્લભં યેન કેનાપિ ધીમતા લભ્યતે પરમ્ ॥ ૩.૧૦૯॥

અનુષ્ઠાને કૃતે પ્રાણઃ સમશ્ચલતિ તત્ક્ષણાત્ ।
ભવેદભ્યાસને સમ્યક્સાધકસ્ય ન સંશયઃ ॥ ૩.૧૧૦॥

પદ્માસને સ્થિતો યોગી પ્રાણાપાનવિધાનતઃ ।
પૂરયેત્સ વિમુક્તઃ સ્યાત્સત્યં સત્યં વદામ્યહમ્ ॥ ૩.૧૧૧॥

ઉગ્રાસનકથનમ્ ।

પ્રસાર્ય ચરણદ્વન્દ્વં પરસ્પરમસંયુતમ્ ।
સ્વપાણિભ્યાં દૃઢં ધૃત્વા જાનૂપરિ શિરોન્યસેત્ ॥ ૩.૧૧૨॥

આસનોગ્રમિદં પ્રોક્તં ભવેદનિલદીપનમ્ ।
દેહાવસાનહરણં પશ્ચિમોત્તાનસંજ્ઞકમ્ ॥ ૩.૧૧૩॥

ય એતદાસનં શ્રેષ્ઠં પ્રત્યહં સાધયેત્સુધીઃ ।
વાયુઃ પશ્ચિમમાર્ગેણ તસ્ય સઞ્ચરતિ ધ્રુવમ્ ॥ ૩.૧૧૪॥

એતદભ્યાસશીલાનાં સર્વસિદ્ધિઃ પ્રજાયતે ।
તસ્માદ્યોગી પ્રયત્નેન સાધયેત્સિદ્ધમાત્મનઃ ॥ ૩.૧૧૫॥

ગોપનીયં પ્રયત્નેન ન દેયં યસ્ય કસ્યચિત્ ।
યેન શીઘ્રં મરુત્સિદ્ધિર્ભવેદ્દુઃખૌઘનાશિની ॥ ૩.૧૧૬॥

સ્વસ્તિકાસનકથનમ્ ।
જાનૂર્વોરન્તરે સમ્યગ્ધૃત્વા પાદતલે ઉભે ।
સમકાયઃ સુખાસીનઃ સ્વસ્તિકં તત્પ્રચક્ષતે ॥ ૩.૧૧૭॥

અનેન વિધિના યોગી મારુતં સાધયેત્સુધીઃ ।
દેહે ન ક્રમતે વ્યાધિસ્તસ્ય વાયુશ્ચ સિદ્ધ્યતિ ॥ ૩.૧૧૮॥

સુખાસનમિદં પ્રોક્તં સર્વદુઃખપ્રણાશનમ્ ।
સ્વસ્તિકં યોગિભિર્ગોપ્યં સ્વસ્તીકરણમુત્તમમ્ ॥ ૩.૧૧૯॥

ઇતિ શ્રીશિવસંહિતાયાં હરગૌરીસંવાદે યોગશાસ્ત્રે
યોગાભ્યાસતત્ત્વકથનં નામ તૃતીયપટલઃ સમાપ્તઃ । ૩।

## ચતુર્થપટલઃ

અથ મુદ્રાકથનમ્ ।
આદૌ પૂરક યોગેન સ્વાધારે પૂરયેન્મનઃ ।
ગુદમેઢ્રાન્તરે યોનિસ્તામાકુઞ્ચ્ય પ્રવર્તતે ॥ ૪.૧॥

યોનિમુદ્રાકથનમ્ ।
બ્રહ્મયોનિગતં ધ્યાત્વા કામં કન્દુકસન્નિભમ્ ।
સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ॥ ૪.૨॥

તસ્યોર્ધ્વં તુ શિખાસૂક્ષ્મા ચિદ્રૂપા પરમાકલા ।
તયા સહિતમાત્માનમેકીભૂતં વિચિન્તયેત્ ॥ ૪.૩॥

ગચ્છતિ બ્રહ્મમાર્ગેણ લિઙ્ગત્રયક્રમેણ વૈ ।

સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ॥ ૪.૪॥

અમૃતં તદ્ધિ સ્વર્ગસ્થં પરમાનન્દલક્ષણમ્ ।
શ્વેતરક્તં તેજસાઢ્યં સુધાધારાપ્રવર્ષિણમ્ ।
પીત્વા કુલામૃતં દિવ્યં પુનરેવ વિશેત્કુલમ્ ॥ ૪.૫॥

પુનરેવ કુલં ગચ્છેન્માત્રાયોગેન નાન્યથા ।
સા ચ પ્રાણસમાખ્યાતા હ્યસ્મિંસ્તન્ત્રે મયોદિતા ॥ ૪.૬॥

પુનઃ પ્રલીયતે તસ્યાં કાલાગ્ન્યાદિશિવાત્મકમ્ ।
યોનિમુદ્રા પરા હ્યેષા બન્ધસ્તસ્યાઃ પ્રકીર્તિતઃ ॥ ૪.૭॥

તસ્યાસ્તુ બન્ધામત્રેણ તન્નાસ્તિ યન્ન સાધયેત્ ॥ ૪.૮॥

છિન્નરૂપાસ્તુ યે મન્ત્રાઃ કીલિતાઃ સ્તમ્ભિતાશ્ચ યે ।
દગ્ધામન્ત્રાઃ શિરોહીના મલિનાસ્તુ તિરસ્કૃતાઃ ॥ ૪.૯॥

મન્દા બાલાસ્તથા વૃદ્ધાઃ પ્રૌઢા યૌવનગર્વિતાઃ ।
ભેદિનો ભ્રમસંયુક્તાઃ સપ્તાહં મૂર્ચ્છિતાશ્ચયે ॥ ૪.૧૦॥

અરિપક્ષે સ્થિતા યે ચ નિર્વીર્યાઃ સત્ત્વવર્જિતાઃ ।
તથા સત્ત્વેન હીનાશ્ચ ખણ્ડિતાઃ શતધાકૃતાઃ ॥ ૪.૧૧॥

વિધિનાનેન ચ સંયુક્તઃ પ્રભવન્ત્યચિરેણ તુ । (વિધાનેન ચ સંયુક્તાઃ)
સિદ્ધિમોક્ષપ્રદાઃ સર્વે ગુરુણા વિનિયોજિતાઃ ॥ ૪.૧૨॥

યદ્યુચ્ચરતે યોગી મન્ત્રરૂપં શુભાશુભમ્ ।
તત્સિદ્ધિં સમવાપ્નોતિ યોનિમુદ્રાનિબન્ધનાત્ ॥ ૪.૧૩॥

દીક્ષયિત્વા વિધાનેન અભિષિચ્ય સહસ્રધા ।
તતો મન્ત્રાધિકારાર્થમેષા મુદ્રા પ્રકીર્તિતા ॥ ૪.૧૪॥

બ્રહ્મહત્યાસહસ્રાણિ ત્રૈલોક્યમપિ ઘાતયેત્ ।
નાસૌ લિપ્યતિ પાપેન યોનિમુદ્રાનિબન્ધનાત્ ॥ ૪.૧૫॥

ગુરુહા ચ સુરાપી ચ સ્તેયી ચ ગુરુતલ્પગઃ ।
એતૈઃ પાપૈર્ન બધ્યેત યોનિમુદ્રાનિબન્ધનાત્ ॥ ૪.૧૬॥

તસ્માદભ્યાસનં નિત્યં કર્તવ્યં મોક્ષકાઙ્ક્ષિભિઃ ।
અભ્યાસાજ્જાયતે સિદ્ધિરભ્યાસાન્મોક્ષમાપ્નુયાત્ ॥ ૪.૧૭॥

સંવિદં લભતેઽભ્યાસાદ્યોગોભ્યાસાત્પ્રવર્તતે ।
મુદ્રાણાં સિદ્ધિરભ્યાસાદભ્યાસાદ્વાયુસાધનમ્ ॥ ૪.૧૮॥

કાલવઞ્ચનમભ્યાસાત્તથા મૃત્યુઞ્જયો ભવેત્ ।
વાક્સિદ્ધિઃ કામચારિત્વં ભવેદભ્યાસયોગતઃ ॥ ૪.૧૯॥

યોનિમુદ્રા પરં ગોપ્યા ન દેયા યસ્ય કસ્યચિત્ ।
સર્વથા નૈવ દાતવ્યા પ્રાણૈઃ કણ્ઠગતૈરપિ ॥ ૪.૨૦॥

અધુના કથયિષ્યામિ યોગસિદ્ધિકરં પરમ્ ।
ગોપનીયં સુસિદ્ધાનાં યોગં પરમદુર્લભમ્ ॥ ૪.૨૧॥

સુપ્તા ગુરુપ્રસાદેન યદા જાગર્તિ કુણ્ડલી ।
તદા સર્વાણિ પદ્માનિ ભિદ્યન્તે ગ્રન્થયોપિ ચ ॥ ૪.૨૨॥

તસ્માત્સર્વપ્રયત્નેન પ્રબોધયિતુમીશ્વરીમ્ ।
બ્રહ્મરન્ધ્રમુખે સુપ્તાં મુદ્રાભ્યાસં સમાચરેત્ ॥ ૪.૨૩॥

મહામુદ્રા મહાબન્ધો મહાવેધશ્ચ ખેચરી ।
જાલન્ધરો મૂલબન્ધો વિપરીતકૃતિસ્તથા ॥ ૪.૨૪॥

ઉડ્ડાનં ચૈવ વજ્રોણી દશમે શક્તિચાલનમ્ ।
ઇદં હિ મુદ્રાદશકં મુદ્રાણામુત્તમોત્તમમ્ ॥ ૪.૨૫॥

મહામુદ્રાકથનમ્ ।

મહામુદ્રાં પ્રવક્ષ્યામિ તન્ત્રેઽસ્મિન્મમવલ્લભે ।
યાં પ્રાપ્ય સિદ્ધાઃ સિદ્ધિં ચ કપિલાદ્યાઃ પુરાગતાઃ ॥ ૪.૨૬॥

અપસવ્યેન સમ્પીડ્ય પાદમૂલેન સાદરમ્ ।
ગુરૂપદેશતો યોનિં ગુદમેઢ્રાન્તરાલગામ્ ॥ ૪.૨૭॥

સવ્યં પ્રસારિતં પાદં ધૃત્વા પાણિયુગેન વૈ । (પ્રસારિત પાદ)
નવદ્વારાણિ સંયમ્ય ચિબુકં હૃદયોપરિ ॥ ૪.૨૮॥

ચિત્તં ચિત્તપથે દત્ત્વા પ્રભવેદ્વાયુસાધનમ્ ।
મહામુદ્રાભવેદેષા સર્વતન્ત્રેષુ ગોપિતા ॥ ૪.૨૯॥

વામાઙ્ગેન સમભ્યસ્ય દક્ષાઙ્ગેનાભ્યસેત્ પુનઃ ।
પ્રાણાયામં સમં કૃત્વા યોગી નિયતમાનસઃ ॥ ૪.૩૦॥

અનેન વિધિના યોગી મન્દભાગ્યોઽપિ સિધ્યતિ ।

સર્વાસામેવ નાડીનાં ચાલનં બિન્દુમારણમ્ ॥ ૪.૩૧॥

જીવનન્તુ કષાયસ્ય પાતકાનાં વિનાશનમ્ ।
કુણ્ડાલીતાપનં વાયોર્બ્રહ્મરન્ધ્રપ્રવેશનમ્ ॥ ૪.૩૨॥

સર્વરોગોપશમનં જઠરાગ્નિવિવર્ધનમ્ ।
વપુષા કાન્તિમમલાં જરામૃત્યુવિનાશનમ્ ॥ ૪.૩૩॥

વાઞ્છિતાર્થફલં સૌખ્યમિન્દ્રિયાણાઞ્ચ મારણમ્ ।
એતદુક્તાનિ સર્વાણિ યોગારૂઢસ્ય યોગિનઃ ।
ભવેદભ્યાસતોઽવશ્યં નાત્ર કાર્યા વિચારણા ॥ ૪.૩૪॥

ગોપનીયા પ્રયત્નેન મુદ્રેયં સુરપૂજિતે ।
યાન્તુ પ્રાપ્ય ભવામ્ભોધેઃ પારં ગચ્છન્તિ યોગિનઃ ॥ ૪.૩૫॥

મુદ્રા કામદુઘા હ્યેષા સાધકાનાં મયોદિતા ।
ગુપ્તાચારેણ કર્તવ્યા ન દેયા યસ્ય કસ્યચિત્ ॥ ૪.૩૬॥

મહાબન્ધકથનમ્ ।

તતઃ પ્રસારિતઃ પાદો વિન્યસ્ય તમુરૂપરિ ॥ ૪.૩૭॥

ગુદયોનિં સમાકુઞ્ચ્ય કૃત્વા ચાપાનમૂર્ધ્વગમ્ ।
યોજયિત્વા સમાનેન કૃત્વા પ્રાણમધોમુખમ્ ॥ ૪.૩૮॥

બન્ધયેદૂર્ધ્વગત્યર્થં પ્રાણાપાનેન યઃ સુધીઃ ।
કથિતોઽયં મહાબન્ધઃ સિદ્ધિમાર્ગપ્રદાયકઃ ॥ ૪.૩૯॥

નાડીજાલાદ્રસવ્યૂહો મૂર્ધાનં યાતિ યોગિનઃ ।
ઉભાભ્યાં સાધયેત્પદ્ભ્યામેકૈકં સુપ્રયત્નતઃ ॥ ૪.૪૦॥

ભવેદભ્યાસતો વાયુઃ સુષુમ્ણામધ્યસઙ્ગતઃ ।
અનેન વપુષઃ પુષ્ટિર્દૃઢબન્ધોઽસ્થિપઞ્જરે ॥ ૪.૪૧॥

સમ્પૂર્ણહૃદયો યોગી ભવન્ત્યેતાનિ યોગિનઃ ।
બન્ધેનાનેન યોગીન્દ્રઃ સાધયેત્સર્વમીપ્સિતમ્ ॥ ૪.૪૨॥

મહાવેધકથનમ્ ।

અપાનપ્રાણયોરૈક્યં કૃત્વા ત્રિભુવનેશ્વરિ ।
મહાવેધસ્થિતો યોગી કુક્ષિમાપૂર્ય વાયુના ।
સ્ફિચૌ સન્તાડયેદ્ધીમાન્વેધોઽયં કીર્તિતો મયા ॥ ૪.૪૩॥

વેધેનાનેન સંવિધ્ય વાયુના યોગિપુઙ્ગવઃ ।
ગ્રન્થિં સુષુમ્ણામાર્ગેણ બ્રહ્મગ્રન્થિં ભિનત્ત્યસૌ ॥ ૪.૪૪॥

યઃ કરોતિ સદાભ્યાસં મહાવેધં સુગોપિતમ્ ।
વાયુસિદ્ધિર્ભવેત્તસ્ય જરામરણનાશિની ॥ ૪.૪૫॥

ચક્રમધ્યે સ્થિતા દેવાઃ કમ્પન્તિ વાયુતાડનાત્ ।
કુણ્ડલ્યપિ મહામાયા કૈલાસે સા વિલીયતે ॥ ૪.૪૬॥

મહામુદ્રામહાબન્ધૌ નિષ્ફલૌ વેધવર્જિતૌ । (નિષ્ફલો)
તસ્માદ્યોગી પ્રયત્નેન કરોતિ ત્રિતયં ક્રમાત્ ॥ ૪.૪૭॥

એતત્ત્રયં પ્રયત્નેન ચતુર્વારં કરોતિ યઃ ।
ષણ્માસાભ્યન્તરં મૃત્યુઞ્જયત્યેવ ન સંશયઃ ॥ ૪.૪૮॥

એતત્ત્રયસ્ય માહાત્મ્યં સિદ્ધો જાનાતિ નેતરઃ ।
યજ્જ્ઞાત્વા સાધકાઃ સર્વે સિદ્ધિં સમ્યગ્લભન્તિ વૈ ॥ ૪.૪૯॥

ગોપનીયા પ્રયત્નેન સાધકૈઃ સિદ્ધિમીપ્સુભિઃ ।
અન્યથા ચ ન સિદ્ધિઃ સ્યાન્મુદ્રાણામેષ નિશ્ચયઃ ॥ ૪.૫૦॥

ખેચરીમુદ્રાકથનમ્ ।

ભ્રુવોરન્તર્ગતાં દૃષ્ટિં વિધાય સુદૃઢાં સુધીઃ ॥ ૪.૫૧॥ (સુદૃઢા)

ઉપવિશ્યાસને વજ્રે નાનોપદ્રવવર્જિતઃ ।
લમ્બિકોર્ધ્વં સ્થિતે ગર્તે રસનાં વિપરીતગામ્ ॥ ૪.૫૨॥

સંયોજયેત્પ્રયત્નેન સુધાકૂપે વિચક્ષણઃ ।
મુદ્રૈષા ખેચરી પ્રોક્તા ભક્તાનામનુરોધતઃ ॥ ૪.૫૩॥

સિદ્ધીનાં જનની હ્યેષા મમ પ્રાણાધિકપ્રિયા ।
નિરન્તરકૃતાભ્યાસાત્પીયૂષં પ્રત્યહં પિબેત્ ।
તેન વિગ્રહસિદ્ધિઃ સ્યાન્મૃત્યુમાતઙ્ગકેસરી ॥ ૪.૫૪॥

અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોઽપિ વા ।
ખેચરી યસ્ય શુદ્ધા તુ સ શુદ્ધો નાત્ર સંશયઃ ॥ ૪.૫૫॥

ક્ષણાર્ધં કુરુતે યસ્તુ તીર્ત્વા પાપમહાર્ણવમ્ ।
દિવ્યભોગાન્પ્રભુક્ત્વા ચ સત્કુલે સ પ્રજાયતે ॥ ૪.૫૬॥

મુદ્રૈષા ખેચરી યસ્તુ સ્વસ્થચિત્તો હ્યતન્દ્રિતઃ ।

શતબ્રહ્મગતેનાપિ ક્ષણાર્ધં મન્યતે હિ સઃ ॥ ૪.૫૭॥

ગુરૂપદેશતો મુદ્રાં યો વેત્તિ ખેચરીમિમામ્ ।
નાનાપાપરતો ધીમાન્ સ યાતિ પરમાં ગતિમ્ ॥ ૪.૫૮॥

સા પ્રાણસદૃશી મુદ્રા યસ્મિન્કસ્મિન્ન દીયતે । (યસ્મૈ કસ્મૈ ન)
પ્રચ્છાદ્યતે પ્રયત્નેન મુદ્રેયં સુરપૂજિતે ॥ ૪.૫૯॥

જાલન્ધરબન્ધકથનમ્ ।
બદ્ધ્વાગલશિરાજાલં હૃદયે ચિબુકં ન્યસેત્ ।
બન્ધોજાલન્ધરઃ પ્રોક્તો દેવાનામપિ દુર્લભઃ ॥ ૪.૬૦॥

નાભિસ્થવહ્નિર્જન્તૂનાં સહસ્રકમલચ્યુતમ્ ।
પિબેત્પીયૂષવિસ્તારં તદર્થં બન્ધયેદિમમ્ ॥ ૪.૬૧॥

બન્ધેનાનેન પીયૂષં સ્વયં પિબતિ બુદ્ધિમાન્ ।
અમરત્વઞ્ચ સમ્પ્રાપ્ય મોદતે ભુવનત્રયે ॥ ૪.૬૨॥

જાલન્ધરો બન્ધ એષ સિદ્ધાનાં સિદ્ધિદાયકઃ ।
અભ્યાસઃ ક્રિયતે નિત્યં યોગિના સિદ્ધિમિચ્છતા ॥ ૪.૬૩॥

મૂલબન્ધકથનમ્ ।
પાદમૂલેન સમ્પીડ્ય ગુદમાર્ગેષુ યન્ત્રિતમ્ ॥ ૪.૬૪॥

બલાદપાનમાકૃષ્ય ક્રમાદૂર્ધ્વં સુચારયેત્ ।
કલ્પિતોઽયં મૂલબન્ધો જરામરણનાશનઃ ॥ ૪.૬૫॥

અપાનપ્રાણયોરૈક્યં પ્રકરોત્યધિકલ્પિતમ્ ।
બન્ધેનાનેન સુતરાં યોનિમુદ્રા પ્રસિદ્ધ્યતિ ॥ ૪.૬૬॥

સિદ્ધાયાં યોનિમુદ્રાયાં કિં ન સિદ્ધ્યતિ ભૂતલે ।
બન્ધસ્યાસ્ય પ્રસાદેન ગગને વિજિતાનિલઃ ।
પદ્માસને સ્થિતો યોગી ભુવમુત્સૃજ્ય વર્તતે ॥ ૪.૬૭॥

સુગુપ્તે નિર્જને દેશે બન્ધમેનં સમભ્યસેત્ ।
સંસારસાગરં તર્તું યદીચ્છેદ્યોગિ પુઙ્ગવઃ ॥ ૪.૬૮॥

વિપરીતકરણીમુદ્રાકથનમ્ ।
ભૂતલે સ્વશિરોદત્ત્વા ખે નયેચ્ચરણદ્વયમ્ ।
વિપરીતકૃતિશ્ચૈષા સર્વતન્ત્રેષુ ગોપિતા ॥ ૪.૬૯॥

એતદ્યઃ કુરુતે નિત્યમભ્યાસં યામમાત્રતઃ ।
મૃત્યુઞ્જયતિ સ યોગી પ્રલયેનાપિ સીદતિ ॥ ૪.૭૦॥ (યોગીશઃ)

કુરુતેઽમૃતપાનં યઃ સિદ્ધાનાં સમતામિયાત્ ।
સ સેવ્યઃ સર્વલોકાનાં બન્ધમેનં કરોતિ યઃ ॥ ૪.૭૧॥

ઉડ્ડયાનબન્ધકથનમ્ ।
નાભેરૂર્ધ્વમધશ્ચાપિ તાનં પશ્ચિમમાચરેત્ ।
ઉડ્ડ્યાનબન્ધ એષ સ્યાત્સર્વદુઃખૌઘનાશનઃ ॥ ૪.૭૨॥

ઉદરે પશ્ચિમં તાનં નાભેરૂર્ધ્વં તુ કારયેત્ ।
ઉડ્ડ્યાનાખ્યોઽત્ર બન્ધોઽયં મૃત્યુમાતઙ્ગકેસરી ॥ ૪.૭૩॥

નિત્યં યઃ કુરુતે યોગી ચતુર્વારં દિને દિને ।
તસ્ય નાભેસ્તુ શુદ્ધિઃ સ્યાદ્યેન સિદ્ધો ભવેન્મરુત્ ॥ ૪.૭૪॥ (નાભેસ્સુશુદ્ધિઃ સાદ્યેન)

ષણ્માસમભ્યસન્યોગી મૃત્યુઞ્જયતિ નિશ્ચિતમ્ ।
તસ્યોદરાગ્નિર્જ્વલતિ રસવૃદ્ધિઃ પ્રજાયતે ॥ ૪.૭૫॥

અનેન સુતરાં સિદ્ધિર્વિગ્રહસ્ય પ્રજાયતે ।
રોગાણાં સઙ્ક્ષયશ્ચાપિ યોગિનો ભવતિ ધ્રુવમ્ ॥ ૪.૭૬॥

ગુરોર્લબ્ધ્વા પ્રયત્નેન સાધયેત્તુ વિચક્ષણઃ ।
નિર્જને સુસ્થિતે દેશે બન્ધં પરમદુર્લભમ્ ॥ ૪.૭૭॥

વજ્રોલીમુદ્રાકથનમ્ ।
વજ્રોલીં કથયિષ્યામિ સંસારધ્વાન્તનાશિનીમ્ ।
સ્વેભક્તેભ્યઃ સમાસેન ગુહ્યાદ્ગુહ્યતમામપિ ॥ ૪.૭૮॥

સ્વેચ્છયા વર્તમાનોઽપિ યોગોક્તનિયમૈર્વિના ।
મુક્તો ભવતિ ગાર્હસ્થો વજ્રોલ્યભ્યસયોગતઃ ॥ ૪.૭૯॥

વજ્રોલ્યભ્યાસયોગોઽયં ભોગે યુક્તેઽપિ મુક્તિદઃ ।
તસ્માદતિપ્રયત્નેન કર્તવ્યો યોગિભિઃ સદા ॥ ૪.૮૦॥

આદૌ રજઃ સ્ત્રિયો યોન્યાઃ યત્નેન વિધિવત્સુધીઃ ।
આકુઞ્ચ્ય લિઙ્ગનાલેન સ્વશરીરે પ્રવેશયેત્ ॥ ૪.૮૧॥

સ્વકં બિન્દુશ્ચ સમ્બન્ધ્ય લિઙ્ગચાલનમાચરેત્ ।
દૈવાચ્ચલતિ ચેદૂર્ધ્વં નિબદ્ધો યોનિમુદ્રયા ॥ ૪.૮૨॥

વામમાર્ગેऽપિ તદ્બિન્દું નીત્વા લિઙ્ગં નિવારયેત્ ।
ક્ષણમાત્રં યોનિતો યઃ પુમાંશ્ચાલનમાચરેત્ ॥ ૪.૮૩॥

ગુરૂપદેશતો યોગી હુંહુઙ્કારેણ યોનિતઃ ।
અપાનવાયુમાકુઞ્ચ્ય બલાદાકૃષ્ય તદ્રજઃ ॥ ૪.૮૪॥

અનેન વિધિના યોગી ક્ષિપ્રં યોગસ્ય સિદ્ધયે ।
ભવ્યભુક્કુરુતે યોગી ગુરુપાદાબ્જપૂજકઃ ॥ ૪.૮૫॥

બિન્દુર્વિધુમયો જ્ઞેયો રજઃ સૂર્યમયસ્તથા ।
ઉભયોર્મેલનં કાર્યં સ્વશરીરે પ્રવેશયેત્ ॥ ૪.૮૬॥

અહં બિન્દૂ રજઃ શક્તિરુભયોર્મેલનં યદા ।
યોગિનાં સાધનાવસ્થા ભવેદ્દિવ્યં વપુસ્તદા ॥ ૪.૮૭॥

મરણં બિન્દુપાતેન જીવનં બિન્દુધારણે ।
તસ્માદતિપ્રયત્નેન કુરુતે બિન્દુધારણમ્ ॥ ૪.૮૮॥

જાયતે મ્રિયતે લોકે બિન્દુના નાત્ર સંશયઃ ।
એતજ્જ્ઞાત્વા સદા યોગી બિન્દુધારણમાચરેત્ ॥ ૪.૮૯॥

સિદ્ધે બિન્દૌ મહાયત્ને કિં ન સિધ્યતિ ભૂતલે ।
યસ્ય પ્રસાદાન્મહિમા મમાપ્યેતાદૃશો ભવેત્ ॥ ૪.૯૦॥

બિન્દુઃ કરોતિ સર્વેષાં સુખં દુઃખઞ્ચ સંસ્થિતઃ ।
સંસારિણાં વિમૂઢાનાં જરામરણશાલિનામ્ ॥ ૪.૯૧॥

અયં ચ શાઙ્કરો યોગો યોગિનામુત્તમોત્તમઃ ॥ ૪.૯૨॥

અભ્યાસાત્સિદ્ધિમાપ્નોતિ ભોગયુક્તોऽપિ માનવઃ ।
સકલઃ સાધિતાર્થોऽપિ સિદ્ધો ભવતિ ભૂતલે ॥ ૪.૯૩॥

ભુક્ત્વા ભોગાનશેષાન્ વૈ યોગેનાનેન નિશ્ચિતમ્ ।
અનેન સકલા સિદ્ધિર્યોગિનાં ભવતિ ધ્રુવમ્ ।
સુખભોગેન મહતા તસ્માદેનં સમભ્યસેત્ ॥ ૪.૯૪॥

સહજોલ્યમરોલી ચ વજ્રોલ્યા ભેદતો ભવેત્ ।
યેન કેન પ્રકારેણ બિન્દું યોગી પ્રધારયેત્ ॥ ૪.૯૫॥

દૈવાચ્ચલતિ ચેદ્વેગે મેલનં ચન્દ્રસૂર્યયોઃ ।
અમરોલિરિયં પ્રોક્તા લિઙ્ગનાલેન શોષયેત્ ॥ ૪.૯૬॥

ગતં બિન્દું સ્વકં યોગી બન્ધયેદ્યોનિમુદ્રયા ।
સહજોલીરિયં પ્રોક્તા સર્વતન્ત્રેષુ ગોપિતા ॥ ૪.૯૭॥

સંજ્ઞાભેદાદ્ભવેદ્ભેદઃ કાર્યં તુલ્યગતિર્યદિ ।
તસ્માત્સર્વપ્રયત્નેન સાધ્યતે યોગિભિઃ સદા ॥ ૪.૯૮॥

અયં યોગો મયા પ્રોક્તો ભક્તાનાં સ્નેહતઃ પ્રિયે ।
ગોપનીયઃ પ્રયત્નેન ન દેયો યસ્ય કસ્યચિત્ ॥ ૪.૯૯॥

એતદ્ગુહ્યતમં ગુહ્યં ન ભૂતં ન ભવિષ્યતિ ।
તસ્માદેતત્પ્રયત્નેન ગોપનીયં સદા બુધૈઃ ॥ ૪.૧૦૦॥

સ્વમૂત્રોત્સર્ગકાલે યો બલાદાકૃષ્ય વાયુના ।
સ્તોકં સ્તોકં ત્યજેન્મૂત્રમૂર્ધ્વમાકૃષ્ય તત્પુનઃ ॥ ૪.૧૦૧॥

ગુરૂપદિષ્ટમાર્ગેણ પ્રત્યહં યઃ સમાચરેત્ ।
બિન્દુસિદ્ધિર્ભવેત્તસ્ય મહાસિદ્ધિપ્રદાયિકા ॥ ૪.૧૦૨॥

ષણ્માસમભ્યસેદ્યો વૈ પ્રત્યહં ગુરુશિક્ષયા ।
શતાઙ્ગનાવિભોગેઽપિ તસ્ય બિન્દુર્ન નશ્યતિ ॥ ૪.૧૦૩॥

સિદ્ધે બિન્દૌ મહાયત્ને કિં ન સિદ્ધ્યતિ પાર્વતિ ।
ઈશત્વં યત્પ્રસાદેન મમાપિ દુર્લભં ભવેત્ ॥ ૪.૧૦૪॥

શક્તિચાલનમુદ્રાકથનમ્ ।

આધારકમલે સુપ્તાં ચાલયેત્કુણ્ડલીં દૃઢામ્ ।
અપાનવાયુમારુહ્ય બલાદાકૃષ્ય બુદ્ધિમાન્ ।
શક્તિચાલનમુદ્રેયં સર્વશક્તિપ્રદાયિની ॥ ૪.૧૦૫॥

શક્તિચાલનમેવં હિ પ્રત્યહં યઃ સમાચરેત્ ।
આયુર્વૃદ્ધિર્ભવેત્તસ્ય રોગાણાં ચ વિનાશનમ્ ॥ ૪.૧૦૬॥

વિહાય નિદ્રાં ભુજગી સ્વયમૂર્ધ્વે ભવેત્ખલુ ।
તસ્માદભ્યાસનં કાર્યં યોગિના સિદ્ધમિચ્છતા ॥ ૪.૧૦૭॥

યઃ કરોતિ સદાભ્યાસં શક્તિચાલનમુત્તમમ્ ।
યેન વિગ્રહસિદ્ધિઃ સ્યાદણિમાદિગુણપ્રદા ॥ ૪.૧૦૮॥

ગુરૂપદેશવિધિના તસ્ય મૃત્યુભયં કુતઃ ।

મુહૂર્તદ્વયપર્યન્તં વિધિના શક્તિનાશનમ્ ॥ ૪.૧૦૯॥

યઃ કરોતિ પ્રયત્નેન તસ્ય સિદ્ધિરદૂરતઃ ।
યુક્તાસનેન કર્તવ્યં યોગિભિઃ શક્તિચાલનમ્ ॥ ૪.૧૧૦॥

એતત્સુમુદ્રાદશકં ન ભૂતં ન ભવિષ્યતિ ।
એકૈકાભ્યાસને સિદ્ધિઃ સિદ્ધો ભવતિ નાન્યથા ॥ ૪.૧૧૧॥

ઇતિ શ્રીશિવસંહિતાયાં હરગૌરીસંવાદે યોગશાસ્ત્રે
મુદ્રાકથનં નામ ચતુર્થપટલઃ સમાપ્તઃ । ૪।

## પઞ્ચમપટલઃ

શ્રીદેવ્યુવાચ ।
બ્રૂહિ મે વાક્યમીશાન પરમાર્થધિયં પ્રતિ ।
યે વિઘ્નાઃ સન્તિ લોકાનાં વદ મે પ્રિય શઙ્કર ॥ ૫.૧॥

ઈશ્વર ઉવાચ ।
શ‌ૃણુ દેવિ પ્રવક્ષ્યામિ યથા વિઘ્નાઃ સ્થિતાઃ સદા ।
મુક્તિં પ્રતિ નરાણાઞ્ચ ભોગઃ પરમબન્ધનઃ ॥ ૫.૨॥

ભોગરૂપયોગવિઘ્નવિધાકથનમ્ ।
નારી શય્યાસનં વસ્ત્રં ધનમસ્ય વિડમ્બનમ્ ।
તામ્બૂલભક્ષ્યાનાનિ રાજ્યૈશ્વર્યવિભૂતયઃ ॥ ૫.૩॥

હૈમં રૌપ્યં તથા તામ્રં રત્નઞ્ચાગુરુધેનવઃ ।
પાણ્ડિત્યં વેદશાસ્ત્રાણિ નૃત્યં ગીતં વિભૂષણમ્ ॥ ૫.૪॥

વંશી વીણા મૃદઙ્ગાશ્ચ ગજેન્દ્રશ્ચાશ્વવાહનમ્ ।
(દારાપત્યાનિ વિષયા વિઘ્ના એતે પ્રકીર્તિતાઃ ।)
ભોગરૂપા ઇમે વિઘ્ના ધર્મરૂપાનિમાઞ્છૃણુ ॥ ૫.૫॥

ધર્મરૂપયોગવિઘ્નકથનમ્ ।
સ્નાનં પૂજાવિધિર્હોમં તથા મોક્ષમયી સ્થિતિઃ ।
વ્રતોપવાસનિયમમૌનમિન્દ્રિયનિગ્રહઃ ॥ ૫.૬॥

ધ્યેયો ધ્યાનં તથા મન્ત્રો દાનં ખ્યાતિર્દિશાસુ ચ ।
વાપીકૂપતડાગાદિપ્રાસાદારામકલ્પના ॥ ૫.૭॥

યજ્ઞાં ચાન્દ્રાયણં કૃચ્છ્રં તીર્થાનિ વિવિધાનિ ચ ।
દૃશ્યન્તે ચ ઇમે વિઘ્ના ધર્મરૂપેણ સંસ્થિતાઃ ॥ ૫.૮॥

જ્ઞાનરૂપવિઘ્નકથનમ્ ।
યત્તુ વિઘ્નં ભવેજ્જ્ઞાનં કથયામિ વરાનને ।
ગોમુખં સ્વાસનં કૃત્વા ધૌતિપ્રક્ષાલનં ચ તત્ ॥ ૫.૯॥

નાડીસઞ્ચારવિજ્ઞાનં પ્રત્યાહારનિરોધનમ્ ।
કુક્ષિસઞ્ચાલનં ક્ષિપ્રં પ્રવેશ ઇન્દ્રિયાધ્વના ।
નાડીકર્માણિ કલ્યાણિ ભોજનં શ્રૂયતાં મમ ॥ ૫.૧૦॥

નવધાતુરસં છિન્ધિ શુણ્ઠિકાશ્તાડયેત્પુનઃ ।
એકકાલં સમાધિઃ સ્યાલ્લિઙ્ગભૂતમિદં શ‍ૃણુ ॥ ૫.૧૧॥

સઙ્ગમં ગચ્છ સાધૂનાં સઙ્કોચં ભજ દુર્જનાત્ ।
પ્રવેશનિર્ગમે વાયોર્ગુરુલક્ષં વિલોકયેત્ ॥ ૫.૧૨॥

પિણ્ડસ્થં રૂપસંસ્થઞ્ચ રૂપસ્થં રૂપવર્જિતમ્ ।
બ્રહ્મૈતસ્મિન્મતાવસ્થા હૃદયઞ્ચ પ્રશામ્યતિ ।
ઇત્યેતે કથિતા વિઘ્ના જ્ઞાનરૂપે વ્યવસ્થિતાઃ ॥ ૫.૧૩॥

ચતુર્વિધયોગકથનમ્ ।
મન્ત્રયોગો હઠશ્ચૈવ લયયોગસ્તૃતીયકઃ ।
ચતુર્થો રાજયોગઃ સ્યાત્સ દ્વિધાભાવવર્જિતઃ ॥ ૫.૧૪॥

ચતુર્ધા સાધકો જ્ઞેયો મૃદુમધ્યાધિમાત્રકાઃ ।
અધિમાત્રતમઃ શ્રેષ્ઠો ભવાબ્ધૌ લઙ્ઘનક્ષમઃ ॥ ૫.૧૫॥

મૃદુસાધકલક્ષણમ્ ।
મન્દોત્સાહી સુસમ્મૂઢો વ્યાધિસ્થો ગુરુદૂષકઃ ।
લોભી પાપમતિશ્ચૈવ બહ્વાશી વનિતાશ્રયઃ ॥ ૫.૧૬॥

ચપલઃ કાતરો રોગી પરાધીનોઽતિનિષ્ઠુરઃ ।
મન્દાચારો મન્દવીર્યો જ્ઞાતવ્યો મૃદુમાનવઃ ॥ ૫.૧૭॥

દ્વાદશાબ્દે ભવેત્સિદ્ધિરેતસ્ય યત્નતઃ પરમ્ ।
મન્ત્રયોગાધિકારી સ જ્ઞાતવ્યો ગુરુણા ધ્રુવમ્ ॥ ૫.૧૮॥

મધ્યમસાધકલક્ષણમ્ ।

સમબુદ્ધિઃ ક્ષમાયુક્તઃ પુણ્યાકાઙ્ક્ષી પ્રિયંવદઃ ।
મધ્યસ્થઃ સર્વકાર્યેષુ સામાન્યઃ સ્યાન્નસંશયઃ ।
એતજ્જ્ઞાત્વૈવ ગુરુભિર્દીયતે મુક્તિતો લયઃ ॥ ૫.૧૯॥

અધિમાત્રસાધકલક્ષણં
સ્થિરબુદ્ધિર્લયે યુક્તઃ સ્વાધીનો વીર્યવાનપિ ।
મહાશયો દયાયુક્તઃ ક્ષમાવાન્ સત્યવાનપિ ॥ ૫.૨૦॥

શૂરો વયઃસ્થઃ શ્રદ્ધાવાન્ ગુરુપાદાબ્જપૂજકઃ ।
યોગાભ્યાસરતશ્ચૈવ જ્ઞાતવ્યશ્ચાધિમાત્રકઃ ॥ ૫.૨૧॥

એતસ્ય સિદ્ધિઃ ષડ્વર્ષૈર્ભવેદભ્યાસયોગતઃ ।
એતસ્મૈ દીયતે ધીરો હઠયોગશ્ચ સાઙ્ગતઃ ॥ ૫.૨૨॥

અધિમાત્રતમસાધકલક્ષણમ્ ।
મહાવીર્યાન્વિતોત્સાહી મનોજ્ઞઃ શૌર્યવાનપિ ।
શાસ્ત્રજ્ઞોઽભ્યાસશીલશ્ચ નિર્મોહશ્ચ નિરાકુલઃ ॥ ૫.૨૩॥

નવયૌવનસમ્પન્નો મિતાહારી જિતેન્દ્રિયઃ ।
નિર્ભયશ્ચ શુચિર્દક્ષો દાતા સર્વજનાશ્રયઃ ॥ ૫.૨૪॥

અધિકારી સ્થિરો ધીમાન્ યથેચ્છાવસ્થિતઃ ક્ષમી ।
સુશીલો ધર્મચારી ચ ગુપ્તચેષ્ટઃ પ્રિયંવદઃ ॥ ૫.૨૫॥

શાસ્ત્રવિશ્વાસસમ્પન્નો દેવતા ગુરુપૂજકઃ ।
જનસઙ્ગવિરક્તશ્ચ મહાવ્યાધિ વિવર્જિતઃ ॥ ૫.૨૬॥

અધિમાત્રતરોજ્ઞેયઃ સર્વયોગસ્ય સાધકઃ । (અધિમાત્રવ્રતશ્ચ / અધિમાત્રવ્રતજ્ઞશ્ચ)
ત્રિભિસ્સંવત્સરૈઃ સિદ્ધિરેતસ્ય નાત્ર સંશયઃ ।
સર્વયોગાધિકારી સ નાત્ર કાર્યા વિચારણા ॥ ૫.૨૭॥

પ્રતીકોપાસનમ્ ।
પ્રતીકોપાસના કાર્યા દૃષ્ટાદૃષ્ટફલપ્રદા ।
પુનાતિ દર્શનાદત્ર નાત્ર કાર્યા વિચારણા ॥ ૫.૨૮॥

ગાઢાતપે સ્વપ્રતિબિમ્બિતેશ્વરં નિરીક્ષ્ય વિસ્ફારિતલોચનદ્વયમ્ ।
યદા નભઃ પશ્યતિ સ્વપ્રતીકં નભોઽઙ્ગણે તત્ક્ષણમેવ પશ્યતિ ॥ ૫.૨૯॥

પ્રત્યહં પશ્યતે યો વૈ સ્વપ્રતીકં નભોઽઙ્ગણે ।

આયુર્વૃદ્ધિર્ભવેત્તસ્ય ન મૃત્યુઃ સ્યાત્કદાચન ॥ ૫.૩૦॥

યદા પશ્યતિ સમ્પૂર્ણં સ્વપ્રતીકં નભોઽઙ્ગણે ।
તદા જયં સભાયાઞ્ચ યુદ્ધે નિર્જિત્ય સઞ્ચરેત્ ॥ ૫.૩૧॥ (જયમવાપ્નોતિ વાયું)

યઃ કરોતિ સદાભ્યાસં ચાત્માનં વિન્દતે પરમ્ । (વન્દતે)
પૂર્ણાનન્દૈકપુરુષં સ્વપ્રતીકપ્રસાદતઃ ॥ ૫.૩૨॥

યાત્રાકાલે વિવાહે ચ શુભે કર્મણિ સઙ્કટે ।
પાપક્ષયે પુણ્યવૃદ્ધૌ પ્રતીકોપાસનઞ્ચરેત્ ॥ ૫.૩૩॥

નિરન્તરકૃતાભ્યાસાદન્તરે પશ્યતિ ધ્રુવમ્ ।
તદા મુક્તિમવાપ્નોતિ યોગી નિયતમાનસઃ ॥ ૫.૩૪॥

અઙ્ગુષ્ઠાભ્યામુભે શ્રોત્રે તર્જનીભ્યાં દ્વિલોચને ।
નાસારન્ધ્રે ચ મધ્યાભ્યામનામાભ્યાં મુખં દૃઢમ્ ॥ ૫.૩૫॥

નિરુધ્ય મારુતં યોગી યદૈવ કુરુતે ભૃશમ્ ।
તદા તત્ક્ષણમાત્માનં જ્યોતીરૂપં સ પશ્યતિ ॥ ૫.૩૬॥

તત્તેજો દૃશ્યતે યેન ક્ષણમાત્રં નિરાકુલમ્ ।
સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ॥ ૫.૩૭॥

નિરન્તરકૃતાભ્યાસાદ્યોગી વિગતકલ્મષઃ ।
સર્વદેહાદિ વિસ્મૃત્ય તદભિન્નઃ સ્વયં ગતઃ ॥ ૫.૩૮॥

યઃ કરોતિ સદાભ્યાસં ગુપ્તાચારેણ માનવઃ ।
સ વૈ બ્રહ્મવિલીનઃ સ્યાત્પાપકર્મરતો યદિ ॥ ૫.૩૯॥

ગોપનીયઃ પ્રયત્નેન સદ્યઃ પ્રત્યયકારકઃ ।
નિર્વાણદાયકો લોકે યોગોઽયં મમ વલ્લભઃ ।
નાદઃ સઞ્જાયતે તસ્ય ક્રમેણાભ્યાસતશ્ચ યઃ ॥ ૫.૪૦॥ (વૈ)

મત્તભૃઙ્ગવેણુવીણાસદૃશઃ પ્રથમો ધ્વનિઃ ।
એવમભ્યાસતઃ પશ્ચાત્ સંસારધ્વાન્તનાશનમ્ ।
ઘણ્ટાનાદસમઃ પશ્ચાત્ ધ્વનિર્મેઘરવોપમઃ ॥ ૫.૪૧॥

ધ્વનૌ તસ્મિન્મનો દત્ત્વા યદા તિષ્ઠતિ નિર્ભરઃ । (નિર્ભયઃ)
તદા સઞ્જાયતે તસ્ય લયસ્ય મમ વલ્લભે ॥ ૫.૪૨॥

તત્ર નાદે યદા ચિત્તં રમતે યોગિનો ભૃશમ્ ।

વિસ્મૃત્ય સકલં બાહ્યં નાદેન સહ શામ્યતિ ॥ ૫.૪૩॥

એતદભ્યાસયોગેન જિત્વા સમ્યગ્ગુણાન્બહૂન્ ।
સર્વારમ્ભપરિત્યાગી ચિદાકાશે વિલીયતે ॥ ૫.૪૪॥

નાસનં સિદ્ધસદૃશં ન કુમ્ભસદૃશં બલમ્ ।
ન ખેચરીસમા મુદ્રા ન નાદસદૃશો લયઃ ॥ ૫.૪૫॥

ષટ્ચક્ર વિવરણમ્ ।
મૂલાધારપદ્મનિરૂપણ ।
ઇદાનીં કથયિષ્યામિ મુક્તસ્યાનુભવં પ્રિયે ।
યજ્જ્ઞાત્વા લભતે મુક્તિં પાપયુક્તોઽપિ સાધકઃ ॥ ૫.૪૬॥

સમભ્યર્ચ્યેશ્વરં સમ્યક્કૃત્વા ચ યોગમુત્તમમ્ ।
ગૃહ્ણીયાત્સુસ્થિતો ભૂત્વા ગુરું સન્તોષ્ય બુદ્ધિમાન્ ॥ ૫.૪૭॥

જીવાદિ સકલં વસ્તુ દત્ત્વા યોગવિદં ગુરુમ્ । (વસ્તું)
સન્તોષ્યાદિપ્રયત્નેન યોગોઽયં ગૃહ્યતે બુધૈઃ ॥ ૫.૪૮॥

વિપ્રાન્સન્તોષ્ય મેધાવી નાનામઙ્ગલસંયુતઃ ।
મમાલયે શુચિર્ભૂત્વા ગૃહ્ણીયાચ્છુભાત્મકમ્ ॥ ૫.૪૯॥

સંન્યસ્યાનેન વિધિના પ્રાક્તનં વિગ્રહાદિકમ્ ।
ભૂત્વા દિવ્યવપુર્યોગી ગૃહ્ણીયાદ્વક્ષ્યમાણકમ્ ॥ ૫.૫૦॥

પદ્માસનસ્થિતો યોગી જનસઙ્ગવિવર્જિતઃ ।
વિજ્ઞાનનાડીદ્વિતયમઙ્ગુલીભ્યાં નિરોધયેત્ ॥ ૫.૫૧॥

સિદ્ધેસ્તદાવિર્ભવતિ સુખરૂપી નિરઞ્જનઃ ।
તસ્મિન્પરિશ્રમઃ કાર્યો યેન સિદ્ધો ભવેત્ખલુ ॥ ૫.૫૨॥

યઃ કરોતિ સદાભ્યાસં તસ્ય સિદ્ધિર્ન દૂરતઃ ।
વાયુસિદ્ધિર્ભવેત્તસ્ય ક્રમાદેવ ન સંશયઃ ॥ ૫.૫૩॥ (વાયુસિદ્ધિભવેત્તસ્ય)

સકૃદ્યઃ કુરુતે યોગી પાપૌઘં નાશયેદ્ધ્રુવમ્ ।
તસ્ય સ્યાન્મધ્યમે વાયોઃ પ્રવેશો નાત્ર સંશયઃ ॥ ૫.૫૪॥

એતદભ્યાસશીલો યઃ સ યોગી દેવપૂજિતઃ ।
અણિમાદિગુણાન્લ્લબ્ધ્વા વિચરેદ્ભુવનત્રયે ॥ ૫.૫૫॥

યો યથાસ્યાનિલાભ્યાસાત્તદ્ભવેત્તસ્ય વિગ્રહઃ ।

તિષ્ઠેદાત્મનિ મેધાવી સંયુતઃ ક્રીડતે ભૃશમ્ ॥ ૫.૫૬॥

એતદ્યોગં પરં ગોપ્યં ન દેયં યસ્ય કસ્યચિત્ ।
સપ્રમાણઃ સમાયુક્તસ્તમેવ કથ્યતે ધ્રુવમ્ ॥ ૫.૫૭॥ (યઃ પ્રમાણૈઃ)

યોગી પદ્માસને તિષ્ઠેત્કણ્ઠકૂપે યદા સ્મરન્ ।
જિહ્વાં કૃત્વા તાલુમૂલે ક્ષુત્પિપાસા નિવર્તતે ॥ ૫.૫૮॥

કણ્ઠકૂપાદધઃસ્થાને કૂર્મનાડ્યસ્તિ શોભના ।
તસ્મિન્ યોગી મનો દત્ત્વા ચિત્તસ્થૈર્યં લભેદ્ભૃશમ્ ॥ ૫.૫૯॥

શિરઃ કપાલે રુદ્રાક્ષ વિવરં ચિન્તયેદ્યદા । રુદ્રાક્ષં
તદા જ્યોતિઃ પ્રકાશઃ સ્યાદ્વિદ્યુત્પુઞ્જસમપ્રભઃ ॥ ૫.૬૦॥

એતચ્ચિન્તનમાત્રેણ પાપાનાં સઙ્ક્ષયો ભવેત્ ।
દુરાચારોઽપિ પુરુષો લભતે પરમં પદમ્ ॥ ૫.૬૧॥

અહર્નિશં યદા ચિન્તાં તત્કરોતિ વિચક્ષણઃ ।
સિદ્ધાનાં દર્શનં તસ્ય ભાષણઞ્ચ ભવેદ્ધ્રુવમ્ ॥ ૫.૬૨॥

તિષ્ઠન્ ગચ્છન્ સ્વપન્ ભુઞ્જન્ ધ્યાયેચ્છૂન્યમહર્નિશમ્ ।
તદાકાશમયો યોગી ચિદાકાશે વિલીયતે ॥ ૫.૬૩॥

એતજ્જ્ઞાનં સદા કાર્યં યોગિના સિદ્ધિમિચ્છતા । (કાય)
નિરન્તરકૃતાભ્યાસાન્મમ તુલ્યો ભવેદ્ધ્રુવમ્ ।
એતજ્જ્ઞાનબલાદ્યોગી સર્વેષાં વલ્લભો ભવેત્ ॥ ૫.૬૪॥

સર્વાન્ ભૂતાન્ જયં કૃત્વા નિરાશીરપરિગ્રહઃ ।
નાસાગ્રે દૃશ્યતે યેન પદ્માસનગતેન વૈ ।
મનસો મરણં તસ્ય ખેચરત્વં પ્રસિદ્ધ્યતિ ॥ ૫.૬૫॥

જ્યોતિઃ પશ્યતિ યોગીન્દ્રઃ શુદ્ધં શુદ્ધાચલોપમમ્ ।
તત્રાભ્યાસબલેનૈવ સ્વયં તદ્રક્ષકો ભવેત્ ॥ ૫.૬૬॥

ઉત્તાનશયને ભૂમૌ સુપ્ત્વા ધ્યાયન્નિરન્તરમ્ ।
સદ્યઃ શ્રમવિનાશાય સ્વયં યોગી વિચક્ષણઃ ॥ ૫.૬૭॥

શિરઃ પશ્ચાત્તુ ભાગસ્ય ધ્યાને મૃત્યુઞ્જયો ભવેત્ ।
ભ્રૂમધ્યે દૃષ્ટિમાત્રેણ હ્યપરઃ પરિકીર્તિતઃ ॥ ૫.૬૮॥

ચતુર્વિધસ્ય ચાન્નસ્ય રસસ્ત્રેધા વિભજ્યતે ।

તત્ર સારતમો લિઙ્ગદેહસ્ય પરિપોષકઃ ॥ ૫.૬૯॥

સપ્તધાતુમયં પિણ્ડમેતિ પુષ્ણાતિ મધ્યગઃ ।
યાતિ વિણ્મૂત્રરૂપેણ તૃતીયઃ સપ્તતો બહિઃ ॥ ૫.૭૦॥

આદ્યભાગ દ્વયં નાડ્યઃ પ્રોક્તાસ્તાઃ સકલા અપિ ।
પોષયન્તિ વપુર્વાયુમાપાદતલમસ્તકમ્ ॥ ૫.૭૧॥

નાડીભિરાભિઃ સર્વાભિર્વાયુઃ સઞ્ચરતે યદા ।
તદૈવાન્નરસો દેહે સામ્યેનેહ પ્રવર્તતે ॥ ૫.૭૨॥

ચતુર્દશાનાં તત્રેહ વ્યાપારે મુખ્યભાગતઃ ।
તા અનુગ્રત્વહીનાશ્ચ પ્રાણસઞ્ચારનાડિકાઃ ॥ ૫.૭૩॥

ગુદાદ્વ્યઙ્ગુલતશ્ચોર્ધ્વં મેઢ્રૈકાઙ્ગુલતસ્ત્વધઃ ।
એવઞ્ચાસ્તિ સમં કન્દં સમતા ચતુરઙ્ગુલમ્ ॥ ૫.૭૪॥ (સમતાચ્ચતુરઙ્ગુલમ્)

પશ્ચિમાભિમુખીઃ યોનિર્ગુદમેઢ્રાન્તરાલગા ।
તત્ર કન્દં સમાખ્યાતં તત્રાસ્તિ કુણ્ડલી સદા ॥ ૫.૭૫॥

સંવેષ્ટ્ય સકલા નાડીઃ સાર્દ્ધત્રિકુટલાકૃતીઃ ।
મુખે નિવેશ્ય સા પુચ્છં સુષુમ્ણાવિવરે સ્થિતા ॥ ૫.૭૬॥

સુપ્તા નાગોપમા હ્યેષા સ્ફુરન્તી પ્રભયા સ્વયા ।
અહિવત્સન્ધિસંસ્થાના વાગ્દેવી બીજસંજ્ઞિકા ॥ ૫.૭૭॥

જ્ઞેયા શક્તિરિયં વિષ્ણોર્નિર્મલા સ્વર્ણભાસ્વરા ।
સત્ત્વં રજસ્તમશ્ચેતિ ગુણત્રયપ્રસૂતિકા ॥ ૫.૭૮॥

તત્ર બન્ધૂકપુષ્પાભં કામબીજં પ્રકીર્તિતમ્ ।
કલહેમસમં યોગે પ્રયુક્તાક્ષરરૂપિણમ્ ॥ ૫.૭૯॥

સુષુમ્ણાપિ ચ સંશ્લિષ્ટા બીજં તત્ર વરં સ્થિતમ્ ।
શરચ્ચન્દ્રનિભં તેજસ્સ્વયમેતત્સ્ફુરત્સ્થિતમ્ ॥ ૫.૮૦॥

સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ।
એતત્ત્રયં મિલિત્વૈવ દેવી ત્રિપુરભૈરવી ।
બીજસંજ્ઞં પરં તેજસ્તદેવ પરિકીર્તિતમ્ ॥ ૫.૮૧॥

ક્રિયાવિજ્ઞાનશક્તિભ્યાં યુતં યત્પરિતો ભ્રમત્ ।
ઉત્તિષ્ઠદ્વિશતસ્ત્વમ્ભઃ સૂક્ષ્મં શોણશિખાયુતમ્ ।

યોનિસ્થં તત્પરં તેજઃ સ્વયમ્ભૂલિઙ્ગસંજ્ઞિતમ્ ॥ ૫.૮૨॥

આધારપદ્મમેતદ્ધિ યોનિર્યસ્યાસ્તિ કન્દતઃ ।
પરિસ્ફુરદ્વાદિસાન્તચતુર્વર્ણં ચતુર્દલમ્ ॥ ૫.૮૩॥

કુલાભિધં સુવર્ણાભં સ્વયમ્ભૂલિઙ્ગસઙ્ગતમ્ ।
દ્વિરણ્ડો યત્ર સિદ્ધોઽસ્તિ ડાકિની યત્ર દેવતા ॥ ૫.૮૪॥

તત્પદ્મમધ્યગા યોનિસ્તત્ર કુણ્ડલિની સ્થિતા ।
તસ્યા ઊર્ધ્વે સ્ફુરત્તેજઃ કામબીજં ભ્રમન્મતમ્ ॥ ૫.૮૫॥

યઃ કરોતિ સદા ધ્યાનં મૂલાધારે વિચક્ષણઃ ।
તસ્ય સ્યાદ્દાર્દુરી સિદ્ધિર્ભૂમિત્યાગક્રમેણ વૈ ॥ ૫.૮૬॥

વપુષઃ કાન્તિરુત્કૃષ્ટા જઠરાગ્નિવિવર્ધનમ્ ।
આરોગ્યઞ્ચ પટુત્વઞ્ચ સર્વજ્ઞત્વઞ્ચ જાયતે ॥ ૫.૮૭॥

ભૂતં ભવ્યં ભવિષ્યચ્ચ વેત્તિ સર્વં સકારણમ્ । (ભવિષ્યઞ્ચ)
અશ્રુતાન્યપિ શાસ્ત્રાણિ સરહસ્યં વદેદ્ધ્રુવમ્ ॥ ૫.૮૮॥ (ભવેદ્ધ્રુવમ્)

વક્ત્રે સરસ્વતી દેવી સદા નૃત્યતિ નિર્ભરમ્ ।
મન્ત્રસિદ્ધિર્ભવેત્તસ્ય જપાદેવ ન સંશયઃ ॥ ૫.૮૯॥

જરામરણદુઃખૌઘાન્નાશયતિ ગુરોર્વચઃ ।
ઇદં ધ્યાનં સદા કાર્યં પવનાભ્યાસિના પરમ્ ।
ધ્યાનમાત્રેણ યોગીન્દ્રો મુચ્યતે સર્વકિલ્બિષાત્ ॥ ૫.૯૦॥ (સર્વકિલ્વિષાત્)

મૂલપદ્મં યદા ધ્યાયેદ્યોગી સ્વયમ્ભુલિઙ્ગકમ્ ।
તદા તત્ક્ષણમાત્રેણ પાપૌઘં નાશયેદ્ધ્રુવમ્ ॥ ૫.૯૧॥

યં યં કામયતે ચિત્તે તં તં ફલમવાપ્નુયાત્ ।
નિરન્તરકૃતાભ્યાસાત્તં પશ્યતિ વિમુક્તિદમ્ ॥ ૫.૯૨॥

બહિરભ્યન્તરે શ્રેષ્ઠં પૂજનીયં પ્રયત્નતઃ ।
તતઃ શ્રેષ્ઠતમં હ્યેતન્નાન્યદસ્તિ મતં મમ ॥ ૫.૯૩॥

આત્મસંસ્થં શિવં ત્યક્ત્વા બહિઃસ્થં યઃ સમર્ચયેત્ ।
હસ્તસ્થં પિણ્ડમુત્સૃજ્ય ભ્રમતે જીવિતાશયા ॥ ૫.૯૪॥

આત્મલિઙ્ગાર્ચનં કુર્યાદનાલસ્યં દિને દિને ।
તસ્ય સ્યાત્સકલા સિદ્ધિર્માત્ર કાર્યા વિચારણા ॥ ૫.૯૫॥

નિરન્તરકૃતાભ્યાસાત્ષણ્માસૈઃ સિદ્ધિમાપ્નુયાત્ । (નિરન્તરકૃતાભ્યાસાત્ષણ્માસે)
તસ્ય વાયુપ્રવેશોઽપિ સુષુમ્ણાયામ્ભવેદ્ધ્રુવમ્ ॥ ૫.૯૬॥

મનોજયઞ્ચ લભતે વાયુબિન્દુવિધારણામ્ । (વાયુબિન્દુવિધારણાત્)
ઐહિકામુષ્મિકીસિદ્ધિર્ભવેન્નૈવાત્ર સંશયઃ ॥ ૫.૯૭॥

સ્વાધિષ્ઠાનચક્રવિવરણમ્ ।

દ્વિતીયન્તુ સરોજઞ્ચ લિઙ્ગમૂલે વ્યવસ્થિતમ્ ।
બાદિલાન્તં ચ ષડ્વર્ણં પરિભાસ્વરષડ્દલમ્ ॥ ૫.૯૮॥

સ્વાધિષ્ઠાનાભિધં તત્તુ પઙ્કજં શોણરૂપકમ્ ।
બાણાખ્યો યત્ર સિદ્ધોઽસ્તિ દેવી યત્રાસ્તિ રાકિણી ॥ ૫.૯૯॥

યો ધ્યાયતિ સદા દિવ્યં સ્વાધિષ્ઠાનારવિન્દકમ્ ।
તસ્ય કામાઙ્ગનાઃ સર્વા ભજન્તે કામમોહિતાઃ ॥ ૫.૧૦૦॥

વિવિધઞ્ચાશ્રુતં શાસ્ત્રં નિઃશઙ્કો વૈ વદેદ્ધ્રુવમ્ ।
સર્વરોગવિનિર્મુક્તો લોકે ચરતિ નિર્ભયઃ ॥ ૫.૧૦૧॥

મરણં ખાદ્યતે તેન સ કેનાપિ ન ખાદ્યતે ।
તસ્ય સ્યાત્પરમા સિદ્ધિરણિમાદિગુણપ્રદા ॥ ૫.૧૦૨॥

વાયુઃ સઞ્ચરતે દેહે રસવૃદ્ધિર્ભવેદ્ધ્રુવમ્ ।
આકાશપઙ્કજગલત્પીયૂષમપિ વર્દ્ધતે ॥ ૫.૧૦૩॥

મણિપૂરચક્રવિવરણમ્ ।

તૃતીયં પઙ્કજં નાભૌ મણિપૂરકસંજ્ઞકમ્ ।
દશારણ્ડાદિફાન્તાર્ણં શોભિતં હેમવર્ણકમ્ ॥ ૫.૧૦૪॥

રુદ્રાખ્યો યત્ર સિદ્ધોઽસ્તિ સર્વમઙ્ગલદાયકઃ ।
તત્રસ્થા લાકિની નામ્ની દેવી પરમધાર્મિકા ॥ ૫.૧૦૫॥

તસ્મિન્ ધ્યાનં સદા યોગી કરોતિ મણિપૂરકે ।
તસ્ય પાતાલસિદ્ધિઃ સ્યાન્નિરન્તરસુખાવહા ॥ ૫.૧૦૬॥

ઈપ્સિતઞ્ચ ભવેલ્લોકે દુઃખરોગવિનાશનમ્ ।
કાલસ્ય વઞ્ચનઞ્ચાપિ પરદેહપ્રવેશનમ્ ॥ ૫.૧૦૭॥

જામ્બૂનદાદિકરણં સિદ્ધાનાં દર્શનં ભવેત્ ।

ઓષધીદર્શનઞ્ચાપિ નિધીનાં દર્શનં ભવેત્ ॥ ૫.૧૦૮॥

અનાહતચક્રવિવરણમ્ ।

હૃદયેऽનાહતં નામ ચતુર્થં પઙ્કજં ભવેત્ ।
કાદિઠાન્તાર્ણસંસ્થાનં દ્વાદશારસમન્વિતમ્ ।
અતિશોણં વાયુબીજં પ્રસાદસ્થાનમીરિતમ્ ॥ ૫.૧૦૯॥

પદ્મસ્થં તત્પરં તેજો બાણલિઙ્ગં પ્રકીર્તિતમ્ ।
યસ્ય સ્મરણમાત્રેણ દૃષ્ટાદૃષ્ટફલં લભેત્ ॥ ૫.૧૧૦॥

સિદ્ધઃ પિનાકી યત્રાસ્તે કાકિની યત્ર દેવતા ।
એતસ્મિન્સતતં ધ્યાનં હૃત્પાથોજે કરોતિ યઃ ।
ક્ષુભ્યન્તે તસ્ય કાન્તા વૈ કામાર્તા દિવ્યયોષિતઃ ॥ ૫.૧૧૧॥

જ્ઞાનઞ્ચાપ્રતિમં તસ્ય ત્રિકાલવિષયમ્ભવેત્ ।
દૂરશ્રુતિર્દૂરદૃષ્ટિઃ સ્વેચ્છયા ખગતાં વ્રજેત્ ॥ ૫.૧૧૨॥

સિદ્ધાનાં દર્શનઞ્ચાપિ યોગિની દર્શનં તથા ।
ભવેત્ખેચરસિદ્ધિશ્ચ ખેચરાણાં જયન્તથા ॥ ૫.૧૧૩॥

યો ધ્યાયતિ પરં નિત્યં બાણલિઙ્ગં દ્વિતીયકમ્ ।
ખેચરી ભૂચરી સિદ્ધિર્ભવેત્તસ્ય ન સંશયઃ ॥ ૫.૧૧૪॥

એતદ્ધ્યાનસ્ય માહાત્મ્યં કથિતું નૈવ શક્યતે ।
બ્રહ્માદ્યાઃ સકલા દેવા ગોપયન્તિ પરન્ત્વિદમ્ ॥ ૫.૧૧૫॥

વિશુદ્ધચક્રવિવરણમ્ ।

કણ્ઠસ્થાનસ્થિતં પદ્મં વિશુદ્ધં નામપઞ્ચમમ્ ।
સુહેમાભં સ્વરોપેતં ષોડશસ્વરસંયુતમ્ ।
છગલાણ્ડોऽસ્તિ સિદ્ધોऽત્ર શાકિની ચાધિદેવતા ॥ ૫.૧૧૬॥

ધ્યાનં કરોતિ યો નિત્યં સ યોગીશ્વરપણ્ડિતઃ ।
કિન્ત્વસ્ય યોગિનોऽન્યત્ર વિશુદ્ધાખ્યે સરોરુહે ।
ચતુર્વેદા વિભાસન્તે સરહસ્યા નિધેરિવ ॥ ૫.૧૧૭॥

ઇહ સ્થાને સ્થિતો યોગી યદા ક્રોધવશો ભવેત્ ।
તદા સમસ્તં ત્રૈલોક્યં કમ્પતે નાત્ર સંશયઃ ॥ ૫.૧૧૮॥

ઇહ સ્થાને મનો યસ્ય દૈવાદ્યાતિ લયં યદા ।

તદા બાહ્યં પરિત્યજ્ય સ્વાન્તરે રમતે ધ્રુવમ્ ॥ ૫.૧૧૯॥

તસ્ય ન ક્ષતિમાયાતિ સ્વશરીરસ્ય શક્તિતઃ ।
સંવત્સરસહસ્રેઽપિ વજ્રાતિકઠિનસ્ય વૈ ॥ ૫.૧૨૦॥

યદા ત્યજતિ તદ્ધ્યાનં યોગીન્દ્રોઽવનિમણ્ડલે ।
તદા વર્ષસહસ્રાણિ મન્યતે તત્ક્ષણં કૃતી ॥ ૫.૧૨૧॥

આજ્ઞાચક્રવિવરણમ્ ।
આજ્ઞાપદ્મં ભ્રુવોર્મધ્યે હક્ષોપેતં દ્વિપત્રકમ્ ।
શુક્લાભં તન્મહાકાલઃ સિદ્ધો દેવ્યત્ર હાકિની ॥ ૫.૧૨૨॥

શરચ્ચન્દ્રનિભં તત્રાક્ષરબીજં વિજૃમ્ભિતમ્ ।
પુમાન્ પરમહંસોઽયં યજ્જ્ઞાત્વા નાવસીદતિ ॥ ૫.૧૨૩॥

એતદેવ પરન્તેજઃ સર્વતન્ત્રેષુ મન્ત્રિણઃ । (તત્ર દેવઃ)
ચિન્તયિત્વા પરાં સિદ્ધિં લભતે નાત્ર સંશયઃ ॥ ૫.૧૨૪॥

તુરીયં ત્રિતયં લિઙ્ગં તદાહં મુક્તિદાયકઃ ।
ધ્યાનમાત્રેણ યોગીન્દ્રો મત્સમો ભવતિ ધ્રુવમ્ ॥ ૫.૧૨૫॥

ઇડા હિ પિઙ્ગલા ખ્યાતા વરણાસીતિ હોચ્યતે ।
વારાણસી તયોર્મધ્યે વિશ્વનાથોઽત્ર ભાષિતઃ ॥ ૫.૧૨૬॥

એતત્ક્ષેત્રસ્ય માહાત્મ્યમૃષિભિસ્તત્ત્વદર્શિભિઃ ।
શાસ્ત્રેષુ બહુધા પ્રોક્તં પરં તત્ત્વં સુભાષિતમ્ ॥ ૫.૧૨૭॥

સુષુમ્ણા મેરુણા યાતા બ્રહ્મરન્ધ્રં યતોઽસ્તિ વૈ ।
તતશ્ચૈષા પરાવૃત્ય તદાજ્ઞાપદ્મદક્ષિણે । (પરાવૃત્યા)
વામનાસાપુટં યાતિ ગઙ્ગેતિ પરિગીયતે ॥ ૫.૧૨૮॥

બ્રહ્મરન્ધ્રે હિ યત્પદ્મં સહસ્રારં વ્યવસ્થિતમ્ ।
તત્ર કન્દેહિ યા યોનિસ્તસ્યાં ચન્દ્રો વ્યવસ્થિતઃ ॥ ૫.૧૨૯॥

ત્રિકોણાકારતસ્તસ્યાઃ સુધા ક્ષરતિ સન્તતમ્ ।
ઇડાયામમૃતં તત્ર સમં સ્રવતિ ચન્દ્રમાઃ ॥ ૫.૧૩૦॥

અમૃતં વહતિ દ્વારા ધારારૂપં નિરન્તરમ્ ।
વામનાસાપુટં યાતિ ગઙ્ગેત્યુક્તા હિ યોગિભિઃ ॥ ૫.૧૩૧॥

આજ્ઞાપઙ્કજદક્ષાંસાદ્વામનાસાપુટઙ્ગતા ।

ઉદગ્વહેતિ તત્રેડા ગઙ્ગેતિ સમુદાહૃતા ॥ ૫.૧૩૨॥ (વરણા)

તતો દ્વયમિહ મધ્યે તુ વારાણસીતિ ચિન્તયેત્ । (દ્વયોર્હિ)
તદાકારા પિઙ્ગલાપિ તદાજ્ઞાકમલોત્તરે । (તદાજ્ઞાકમલાન્તરે)
દક્ષનાસાપુટે યાતિ પ્રોક્તાસ્માભિરસીતિ વૈ ॥ ૫.૧૩૩॥

મૂલાધારે હિ યત્પદ્મં ચતુષ્પત્રં વ્યવસ્થિતમ્ । (ચતુષ્પત્ર)
તત્ર કન્દેઽસ્તિ યા યોનિસ્તસ્યાં સૂર્યો વ્યવસ્થિતઃ ॥ ૫.૧૩૪॥ (તત્ર મધ્યેહિ)

તત્સૂર્યમણ્ડલદ્વારં વિષં ક્ષરતિ સન્તતમ્ । (તત્સૂર્યમણ્ડલદ્વરાદ્વિષં)
પિઙ્ગલાયાં વિષં તત્ર સમર્થયતિ તાપનઃ ॥ ૫.૧૩૫॥ (સમર્પયતિ)

વિષં તત્ર વહન્તી યા ધારારૂપં નિરન્તરમ્ ।
દક્ષનાસાપુટે યાતિ કલ્પિતેયન્તુ પૂર્વવત્ ॥ ૫.૧૩૬॥

આજ્ઞાપઙ્કજવામાસ્યાદ્દક્ષનાસાપુટં ગતા ।
ઉદગ્વહા પિઙ્ગલાપિ પુરાસીતિ પ્રકીર્તિતા ॥ ૫.૧૩૭॥

આજ્ઞાપદ્મમિદં પ્રોક્તં યત્ર દેવો મહેશ્વરઃ ।
પીઠત્રયં તતશ્ચોર્ધ્વં નિરુક્તં યોગચિન્તકૈઃ ।
તદ્બિન્દુનાદશક્ત્યાખ્યં ભાલપદ્મે વ્યવસ્થિતમ્ ॥ ૫.૧૩૮॥

યઃ કરોતિ સદાધ્યાનમાજ્ઞાપદ્મસ્ય ગોપિતમ્ ।
પૂર્વજન્મકૃતં કર્મ વિનશ્યેદવિરોધતઃ ॥ ૫.૧૩૯॥

ઇહ સ્થિતે યદા યોગી ધ્યાનં કુર્યાન્નિરન્તરમ્ । (સદા)
તદા કરોતિ પ્રતિમાં પ્રતિજાપમનર્થવત્ ॥ ૫.૧૪૦॥

યક્ષરાક્ષસગન્ધર્વા અપસરોગણકિન્નરાઃ ।
સેવન્તે ચરણૌ તસ્ય સર્વે તસ્ય વશાનુગાઃ ॥ ૫.૧૪૧॥

કરોતિ રસનાં યોગી પ્રવિષ્ટાં વિપરીતગામ્ ।
લમ્બિકોર્ધ્વેષુ ગર્તેષુ ધૃત્વા ધ્યાનં ભયાપહમ્ ॥ ૫.૧૪૨॥

અસ્મિન્ સ્થાને મનો યસ્ય ક્ષણાર્ધં વર્તતેઽચલમ્ ।
તસ્ય સર્વાણિ પાપાનિ સઙ્ક્ષયં યાન્તિ તત્ક્ષણાત્ ॥ ૫.૧૪૩॥

યાનિ યાનીહ પ્રોક્તાનિ પઞ્ચપદ્મે ફલાનિ વૈ । (યાનિ યાનિ હિ)
તાનિ સર્વાણિ સુતરામેતજ્જ્ઞાનાદ્ભવન્તિ હિ ॥ ૫.૧૪૪॥

યઃ કરોતિ સદાભ્યાસમાજ્ઞા પદ્મે વિચક્ષણઃ ।

વાસનાયા મહાબન્ધં તિરસ્કૃત્ય પ્રમોદતે ॥ ૫.૧૪૫॥

પ્રાણપ્રયાણસમયે તત્પદ્મં યઃ સ્મરન્સુધીઃ ।
ત્યજેત્પ્રાણં સ ધર્માત્મા પરમાત્મનિ લીયતે ॥ ૫.૧૪૬॥

તિષ્ઠન્ ગચ્છન્ સ્વપન્ જાગ્રત્ યો ધ્યાનં કુરુતે નરઃ ।
પાપકર્મવિકુર્વાણો નહિ મજ્જતિ કિલ્બિષે ॥ ૫.૧૪૭॥ (કિલ્વિષે)

રાજયોગાધિકારી સ્યાદેતચ્ચિન્તનતો ધ્રુવમ્ ।
યોગી બન્ધાદ્વિનિર્મુક્તઃ સ્વીયયા પ્રભયા સ્વયમ્ ॥ ૫.૧૪૮॥

દ્વિદલધ્યાનમાહાત્મ્યં કથિતું નૈવ શક્યતે ।
બ્રહ્માદિદેવતાશ્ચૈવ કિઞ્ચિન્મત્તો વિદન્તિ તે ॥ ૫.૧૪૯॥

સહસ્રારચક્રકથનમ્ ।
અત ઊર્ધ્વં તાલુમૂલે સહસ્રારંસરોરુહમ્ ।
અસ્તિ યત્ર સુષુમ્ણાયા મૂલં સવિવરં સ્થિતમ્ ॥ ૫.૧૫૦॥

તાલુમૂલે સુષુમ્ણાસ્ય અધોવક્ત્રા પ્રવર્તતે ।
મૂલાધારેણ યોન્યન્તાઃ સર્વનાડ્યઃ સમાશ્રિતાઃ । (યોન્યસ્તાઃ)
તા બીજભૂતાસ્તત્ત્વસ્ય બ્રહ્મમાર્ગપ્રદાયિકાઃ ॥ ૫.૧૫૧॥

તાલુસ્થાને ચ યત્પદ્મં સહસ્રારં પુરોદિતમ્ ।
તત્કન્દે યોનિરેકાસ્તિ પશ્ચિમાભિમુખી મતા ॥ ૫.૧૫૨॥

તસ્ય મધ્યે સુષુમ્ણાયા મૂલં સવિવરં સ્થિતમ્ । (તસ્યા)
બ્રહ્મરન્ધ્રં તદેવોક્તમામૂલાધારપઙ્કજમ્ ॥ ૫.૧૫૩॥ (બ્રહ્મરન્ધ્ર)

તત્રાન્તરન્ધ્રે ચિચ્છક્તિઃ સુષુમ્ણા કુણ્ડલી સદા ॥ ૫.૧૫૪॥ (તત્રાન્તરન્ધ્રે / તતસ્તદ્રન્ધ્રે) (તચ્છક્તિઃ)

સુષુમ્ણાયાં સ્થિતા નાડી ચિત્રા સ્યાન્મમ વલ્લભે । (સુષુમ્ણાયાં સદા શક્તિશ્ચિત્રા)
તસ્યાં મમ મતે કાર્યા બ્રહ્મરન્ધ્રાદિકલ્પના ॥ ૫.૧૫૫॥

યસ્યાઃ સ્મરણમાત્રેણ બ્રહ્મજ્ઞત્વં પ્રજાયતે ।
પાપક્ષયશ્ચ ભવતિ ન ભૂયઃ પુરુષો ભવેત્ ॥ ૫.૧૫૬॥

પ્રવેશિતં ચલાઙ્ગુષ્ઠં મુખે સ્વસ્ય નિવેશયેત્ ।
તેનાત્ર ન વહત્યેવ દેહચારી સમીરણઃ ॥ ૫.૧૫૭॥ (બહત્યેવ)

તેન સંસારચક્રેઽસ્મિન્ ભ્રમન્તે ચ સર્વદા । (ભ્રમતીત્યેવ સર્વદા)
તદર્થં યે પ્રવર્તન્તે યોગીનઃ પ્રાણધારણે ॥ ૫.૧૫૮॥

તત એવાખિલા નાડી નિરુદ્ધા ચાષ્ટવેષ્ટનમ્ । (વિરુદ્ધા)
ઇયં કુણ્ડલિની શક્તી રન્ધ્રં ત્યજતિ નાન્યથા ॥ ૫.૧૫૯॥

યદા પૂર્ણાસુ નાડીષુ સન્નિરુદ્ધાનિલાસ્તદા ।
બન્ધત્યાગેન કુણ્ડલ્યા મુખં રન્ધ્રાદ્બહિર્ભવેત્ ।
સુષુમ્ણાયાં સદૈવાયં વહેત્પ્રાણસમીરણઃ ॥ ૫.૧૬૦॥

મૂલપદ્મસ્થિતા યોનિર્વામદક્ષિણકોણતઃ ।
ઇડાપિઙ્ગલયોર્મધ્યે સુષુમ્ણા યોનિમધ્યગા ॥ ૫.૧૬૧॥

બ્રહ્મરન્ધ્રન્તુ તત્રૈવ સુષુમ્ણાધારમણ્ડલે ।
યો જાનાતિ સ મુક્તઃ સ્યાત્કર્મબન્ધાદ્વિચક્ષણઃ ॥ ૫.૧૬૨॥

બ્રહ્મરન્ધ્રમુખે તાસાં સઙ્ગમઃ સ્યાદસંશયઃ ।
તસ્મિન્સ્નાને સ્નાતકાનાં મુક્તિઃ સ્યાદવિરોધતઃ ॥ ૫.૧૬૩॥

ગઙ્ગાયમુનયોર્મધ્યે વહત્યેષા સરસ્વતી ।
તાસાન્તુ સઙ્ગમે સ્નાત્વા ધન્યો યાતિ પરાઙ્ગતિમ્ ॥ ૫.૧૬૪॥

ઇડા ગઙ્ગા પુરા પ્રોક્તા પિઙ્ગલા ચાર્કપુત્રિકા ।
મધ્યા સરસ્વતી પ્રોક્તા તાસાં સઙ્ગોઽતિદુર્લભઃ ॥ ૫.૧૬૫॥

સિતાસિતે સઙ્ગમે યો મનસા સ્નાનમાચરેત્ ।
સર્વપાપવિનિર્મુક્તો યાતિ બ્રહ્મ સનાતનમ્ ॥ ૫.૧૬૬॥

ત્રિવેણ્યાં સઙ્ગમે યો વૈ પિતૃકર્મ સમાચરેત્ ।
તારયિત્વા પિતૄન્સર્વાન્સ યાતિ પરમાં ગતિમ્ ॥ ૫.૧૬૭॥

નિત્યં નૈમિત્તિકં કામ્યં પ્રત્યહં યઃ સમાચરેત્ । (નિત્ય)
મનસા ચિન્તયિત્વા તુ સોઽક્ષયં ફલમાપ્નુયાત્ ॥ ૫.૧૬૮॥

સકૃદ્યઃ કુરુતે સ્નાનં સ્વર્ગો સૌખ્યં ભુનક્તિ સઃ । (સ્વર્ગે)
દગ્ધ્વા પાપાનશેષાન્વૈ યોગી શુદ્ધમતિઃ સ્વયમ્ ॥ ૫.૧૬૯॥

અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોઽપિ વા ।
સ્નાનાચરણમાત્રેણ પૂતો ભવતિ નાન્યથા ॥ ૫.૧૭૦॥

મૃત્યુકાલે પ્લુતં દેહં ત્રિવેણ્યાઃ સલિલે યદા ।
વિચિન્ત્ય યસ્ત્યજેત્પ્રાણાન્સ તદા મોક્ષમાપ્નુયાત્ ॥ ૫.૧૭૧॥

નાતઃપરતરં ગુહ્યં ત્રિષુ લોકેષુ વિદ્યતે ।
ગોપ્તવ્યં તત્પ્રયત્નેન ન વ્યાખ્યેયં કદાચન ॥ ૫.૧૭૨॥

બ્રહ્મરન્ધ્રે મનો દત્ત્વા ક્ષણાર્ધં યદિ તિષ્ઠતિ ।
સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ॥ ૫.૧૭૩॥

અસ્મિન્લીનં મનો યસ્ય સ યોગી મયિ લીયતે ।
અણિમાદિગુણાન્ભુક્ત્વા સ્વેચ્છયા પુરુષોત્તમઃ ॥ ૫.૧૭૪॥

એતદ્રન્ધ્રધ્યાનમાત્રેણ મર્ત્યઃ સંસારેઽસ્મિન્વલ્લભો મે ભવેત્સઃ ।
પાપાઞ્જિત્વા મુક્તિમાર્ગાધિકારી જ્ઞાનં દત્ત્વા તારયત્યદ્ભુતં વૈ ॥ ૫.૧૭૫॥

ચતુર્મુખાદિત્રિદશૈરગમ્યં યોગિવલ્લભમ્ ।
પ્રયત્નેન સુગોપ્યં તદ્બ્રહ્મરન્ધ્રં મયોદિતમ્ ॥ ૫.૧૭૬॥

પુરા મયોક્તા યા યોનિઃ સહસ્રારે સરોરુહે ।
તસ્યાઽધો વર્તતે ચન્દ્રસ્તદ્ધ્યાનં ક્રિયતે બુધૈઃ ॥ ૫.૧૭૭॥ (તસ્યાધો)

યસ્ય સ્મરણમાત્રેણ યોગીન્દ્રોઽવનિમણ્ડલે ।
પૂજ્યો ભવતિ દેવાનાં સિદ્ધાનાં સમ્મતો ભવેત્ ॥ ૫.૧૭૮॥

શિરઃકપાલવિવરે ધ્યાયેદ્દુગ્ધમહોદધિમ્ ।
તત્ર સ્થિત્વા સહસ્રારે પદ્મે ચન્દ્રં વિચિન્તયેત્ ॥ ૫.૧૭૯॥

શિરઃકપાલવિવરે દ્વિરષ્ટકલયા યુતઃ ।
પીયૂષભાનુહંસાખ્યં ભાવયેત્તં નિરઞ્જનમ્ ॥ ૫.૧૮૦॥

નિરન્તરકૃતાભ્યાસાત્ત્રિદિને પશ્યતિ ધ્રુવમ્ ।
દૃષ્ટિમાત્રેણ પાપૌઘં દહત્યેવ સ સાધકઃ ॥ ૫.૧૮૧॥

અનાગતઞ્ચ સ્ફુરતિ ચિત્તશુદ્ધિર્ભવેત્ખલુ ।
સદ્યઃ કૃત્વાપિ દહતિ મહાપાતકપઞ્ચકમ્ ॥ ૫.૧૮૨॥

આનુકૂલ્યં ગ્રહા યાન્તિ સર્વે નશ્યન્ત્યુપદ્રવાઃ ।
ઉપસર્ગાઃ શમં યાન્તિ યુદ્ધે જયમવાપ્નુયાત્ ॥ ૫.૧૮૩॥

ખેચરીભૂચરીસિદ્ધિર્ભવેત્ક્ષીરેન્દુદર્શનાત્ ।
ધ્યાનાદેવભવેત્સર્વં નાત્ર કાર્ય વિચારણા ॥ ૫.૧૮૪॥ (કાર્યા)

સન્તતાભ્યાસયોગેન સિદ્ધો ભવતિ માનવઃ । (સતતાભ્યાસયોગેન)
સત્યં સત્યં પુનઃ સત્યં મમ તુલ્યો ભવેદ્ધ્રુવમ્ ।

યોગશાસ્ત્રં ચ પરમં યોગિનાં સિદ્ધિદાયકમ્ ॥ ૫.૧૮૫॥ (યોગશાસ્ત્રેઽપ્યભિરતં)

રાજયોગકથનમ્ ।

અત ઊર્ધ્વં દિવ્યરૂપં સહસ્રારં સરોરુહમ્ ।
બ્રહ્માણ્ડાખ્યસ્ય દેહસ્ય બાહ્યે તિષ્ઠતિ મુક્તિદમ્ ॥ ૫.૧૮૬॥

કૈલાસો નામ તસ્યૈવ મહેશો યત્ર તિષ્ઠતિ ।
અકુલાખ્યોઽવિનાશી ચ ક્ષયવૃદ્ધિવિવર્જિતઃ ॥ ૫.૧૮૭॥ (નકુલાખ્યોઽવિનાશી)

સ્થાનસ્યાસ્ય જ્ઞાનમાત્રેણ નૃણાં, સંસારેઽસ્મિન્સમ્ભવો નૈવ ભૂયઃ ।
ભૂતગ્રામં સન્તતાભ્યાસયોગાત્કર્તું હર્તું સ્યાચ્ચ શક્તિઃ સમગ્રાઃ ॥ ૫.૧૮૮॥ (સમગ્રા)

સ્થાને પરે હંસનિવાસભૂતે, કૈલાસનામ્નીહ નિવિષ્ટચેતાઃ ।
યોગી હૃતવ્યાધિરધઃ કૃતાધિર્વાયુશ્ચિરઞ્જીજીવતિ મૃત્યુમુક્તઃ ॥ ૫.૧૮૯॥ (કૃતાધિવરાયુશ્ચિરં જીવતિ)

ચિત્તવૃત્તિર્યદા લીના કુલાખ્યે પરમેશ્વરે ।
તદા સમાધિસામ્યેન યોગી નિશ્ચલતાં વ્રજેત્ ॥ ૫.૧૯૦॥

નિરન્તરકૃતે ધ્યાને જગદ્વિસ્મરણં ભવેત્ ।
તદા વિચિત્રસામર્થ્યં યોગિનો ભવતિ ધ્રુવમ્ ॥ ૫.૧૯૧॥

તસ્માદ્ગલિતપીયૂષં પિબેદ્યોગી નિરન્તરમ્ ।
મૃત્યોર્મૃત્યું વિધાયાશુ કુલં જિત્વા સરોરુહે ॥ ૫.૧૯૨॥

અત્ર કુણ્ડલિનીશક્તિર્લયં યાતિ કુલાભિધા ।
તદા ચતુર્વિધા સૃષ્ટિર્લીયતે પરમાત્મનિ ॥ ૫.૧૯૩॥

યજ્જ્ઞાત્વા પ્રાપ્ય વિષયં ચિત્તવૃત્તિર્વિલીયતે ।
તસ્મિન્પરિશ્રમં યોગી કરોતિ નિરપેક્ષકઃ ॥ ૫.૧૯૪॥

ચિત્તવૃત્તિયદાલીના તસ્મિન્ યોગી ભવેદ્ધ્રુવમ્ ।
તદા વિજ્ઞાયતેઽખણ્ડજ્ઞાનરૂપો નિરઞ્જનઃ ॥ ૫.૧૯૫॥

બ્રહ્માણ્ડબાહ્યે સઞ્ચિન્ત્ય સ્વપ્રતીકં યથોદિતમ્ ।
તમાવેશ્ય મહચ્છૂન્યં ચિન્તયેદવિરોધતઃ ॥ ૫.૧૯૬॥

આદ્યન્તમધ્યશૂન્યં તત્કોટિસૂર્યસમપ્રભમ્ ।
ચન્દ્રકોટિપ્રતીકાશમભ્યસ્ય સિદ્ધિમાપ્નુયાત્ ॥ ૫.૧૯૭॥

એતદ્ધ્યાનં સદા કુર્યાદનાલસ્યં દિને દિને ।
તસ્ય સ્યાત્સકલા સિદ્ધિર્વત્સરાન્નાત્ર સંશયઃ ॥ ૫.૧૯૮॥

ક્ષણાર્દ્ધં નિશ્ચલં તત્ર મનો યસ્ય ભવેદ્ધ્રુવમ્ । (ક્ષણાર્ધં)
સ એવ યોગી સદ્ભક્તઃ સર્વલોકેષુ પૂજિતઃ ।
તસ્ય કલ્મષસઙ્ઘાતસ્તત્ક્ષણાદેવ નશ્યતિ ॥ ૫.૧૯૯॥

યં દૃષ્ટ્વા ન પ્રવર્તન્તે મૃત્યુસંસારવર્ત્મનિ ।
અભ્યસેત્તં પ્રયત્નેન સ્વાધિષ્ઠાનેન વર્ત્મના ॥ ૫.૨૦૦॥

એતદ્ધ્યાનસ્ય માહાત્મ્યં મયા વક્તું ન શક્યતે ।
યઃ સાધયતિ જાનાતિ સોઽસ્માકમપિ સમ્મતમ્ ॥ ૫.૨૦૧॥ (સમ્મતઃ)

ધ્યાનાદેવ વિજાનાતિ વિચિત્રેફલસમ્ભવમ્ ।
અણિમાદિગુણોપેતો ભવત્યેવ ન સંશયઃ ॥ ૫.૨૦૨॥

રાજાધિરાજયોગકથનમ્ ।

રાજયોગો મયાખ્યાતઃ સર્વતન્ત્રેષુ ગોપિતઃ ।
રાજાધિરાજયોગોઽયં કથયામિ સમાસતઃ ॥ ૫.૨૦૩॥

સ્વસ્તિકઞ્ચાસનં કૃત્વા સુમઠે જન્તુવર્જિતે ।
ગુરું સમ્પૂજ્ય યત્નેન ધ્યાનમેતત્સમાચરેત્ ॥ ૫.૨૦૪॥

નિરાલમ્બં ભવેજ્જીવં જ્ઞાત્વા વેદાન્તયુક્તિતઃ ।
નિરાલમ્બં મનઃ કૃત્વા ન કિઞ્ચિચ્ચિન્તયેત્સુધીઃ ॥ ૫.૨૦૫॥

એતદ્ધ્યાનાન્મહાસિદ્ધિર્ભવત્યેવ ન સંશયઃ ।
વૃત્તિહીનં મનઃ કૃત્વા પૂર્ણરૂપં સ્વયં ભવેત્ ॥ ૫.૨૦૬॥

સાધયેત્સતતં યો વૈ સ યોગી વિગતસ્પૃહઃ ।
અહન્નામ ન કોપ્યસ્તિ સર્વદાત્મૈવ વિદ્યતે ॥ ૫.૨૦૭॥

કો બન્ધઃ કસ્ય વા મોક્ષ એકં પશ્યેત્સદા હિ સઃ ।
એતત્કરોતિ યો નિત્યં સ મુક્તો નાત્ર સંશયઃ ।
સ એવ યોગી સદ્ભક્તઃ સર્વલોકેષુ પૂજિતઃ ॥ ૫.૨૦૮॥

અહમસ્મીતિ યન્મત્વા જીવાત્મપરમાત્મનોઃ ।
અહં ત્વમેતદુભયં ત્યક્ત્વાખણ્ડં વિચિન્તયેત્ ॥ ૫.૨૦૯॥

અધ્યારોપાપવાદાભ્યાં યત્ર સર્વં વિલીયતે ।
તદ્બીજમાશ્રયેદ્યોગી સર્વસઙ્ગવિવર્જિતઃ ॥ ૫.૨૧૦॥

અપરોક્ષં ચિદાનન્દં પૂર્ણં ત્યક્ત્વા ભ્રમાકુલાઃ ।
પરોક્ષં ચાપરોક્ષં ચ કૃત્વા મૂઢા ભ્રમન્તિ વૈ ॥ ૫.૨૧૧॥

ચરાચરમિદં વિશ્વં પરોક્ષં યઃ કરોતિ ચ ।
અપરોક્ષં પરં બ્રહ્મ ત્યક્તં તસ્મિન્પ્રલીયતે ॥ ૫.૨૧૨॥

જ્ઞાનકારણમજ્ઞાનં યથા નોત્પદ્યતે ભૃશમ્ ।
અભ્યાસં કુરુતે યોગી સદા સઙ્ગવિવર્જિતમ્ ॥ ૫.૨૧૩॥

સર્વેન્દ્રિયાણિ સંયમ્ય વિષયેભ્યો વિચક્ષણઃ ।
વિષયેભ્યઃ સુષુપ્ત્યૈવ તિષ્ઠેત્સઙ્ગવિવર્જિતઃ ॥ ૫.૨૧૪॥

એવમભ્યાસતો નિત્યં સ્વપ્રકાશં પ્રકાશતે । (એવમભ્યસતો)
શ્રોતું બુદ્ધિસમર્થાર્થં નિવર્તન્તે ગુરોર્ગિરઃ ।
તદભ્યાસવશાદેકં સ્વતો જ્ઞાનં પ્રવર્તતે ॥ ૫.૨૧૫॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
સાધનાદમલં જ્ઞાનં સ્વયં સ્ફુરતિ તદ્ધ્રુવમ્ ॥ ૫.૨૧૬॥

હઠં વિના રાજયોગો રાજયોગં વિના હઠઃ ।
તસ્માત્પ્રવર્તતે યોગી હઠે સદ્ગુરુમાર્ગતઃ ॥ ૫.૨૧૭॥

સ્થિતે દેહે જીવતિ ચ યોગં ન શ્રિયતે ભૃશમ્ ।
ઇન્દ્રિયાર્થોપભોગેષુ સ જીવતિ ન સંશયઃ ॥ ૫.૨૧૮॥

અભ્યાસપાકપર્યન્તં મિતાન્નંસ્મરણં ભવેત્ ।
અન્યથા સાધનં ધીમાન્કર્તું પારયતીહ ન ॥ ૫.૨૧૯॥

અતીવસાધુસંલાપં સાધુસમ્મતિબુદ્ધિમાન્ ।
કરોતિ પિણ્ડરક્ષાર્થં બહ્વાલાપવિવર્જિતઃ ॥ ૫.૨૨૦॥

ત્યાજ્યતે ત્યજ્યતે સઙ્ગં સર્વથા ત્યજ્યતે ભૃશમ્ । (ત્યજ્યતે ત્યજ્યતે)
અન્યથા ન લભેન્મુક્તિં સત્યં સત્યં મયોદિતમ્ ॥ ૫.૨૨૧॥

ગુહ્યૈવ ક્રિયતેઽભ્યાસઃ સઙ્ગં ત્યક્ત્વા તદન્તરે । (ગુપ્ત્યૈવ)
વ્યવહારાય કર્તવ્યો બાહ્યસઙ્ગો ન રાગતઃ ॥ ૫.૨૨૨॥ (બાહ્યેસઙ્ગાનુરાગતઃ)

સ્વે સ્વે કર્મણિ વર્તન્તે સર્વે તે કર્મસમ્ભવાઃ ।
નિમિત્તમાત્રં કરણે ન દોષોઽસ્તિ કદાચન ॥ ૫.૨૨૩॥

એવં નિશ્ચિત્ય સુધિયા ગૃહસ્થોઽપિ યદાચરેત્ ।

તદા સિદ્ધિમવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૫.૨૨૪॥

પાપપુણ્યવિનિર્મુક્તઃ પરિત્યક્તાઙ્ગસાધકઃ ।
યો ભવેત્સ વિમુક્તઃ સ્યાદ્ગૃહે તિષ્ઠન્સદા ગૃહી ॥ ૫.૨૨૫॥

ન પાપપુણ્યૈર્લિપ્યેત યોગયુક્તો યદા ગૃહી । (સદા)
કુર્વન્નપિ તદા પાપાન્સ્વકાર્યે લોકસઙ્ગ્રહે ॥ ૫.૨૨૬॥

મન્ત્રસાધનકથનમ્ ।

અધુના સમ્પ્રવક્ષ્યામિ મન્ત્રસાધનમુત્તમમ્ ।
ઐહિકામુષ્મિકસુખં યેન સ્યાદવિરોધતઃ ॥ ૫.૨૨૭॥

યસ્મિન્મન્ત્રવરે જ્ઞાતે યોગસિદ્ધિર્ભવેત્ખલુ । (યસ્મિન્મન્ત્રે વરે)
યોગેન સાધકેન્દ્રસ્ય સર્વૈશ્વર્યસુખપ્રદા ॥ ૫.૨૨૮॥

મૂલાધારેઽસ્તિ યત્પદ્મં ચતુર્દલસમન્વિતમ્ ।
તન્મધ્યે વાગ્ભવં બીજં વિસ્ફુરન્તં તડિત્પ્રભમ્ ॥ ૫.૨૨૯॥

હૃદયે કામબીજન્તુ બન્ધૂકકુસુમપ્રભમ્ ।
આજ્ઞારવિન્દે શક્ત્યાખ્યં ચન્દ્રકોટિસમપ્રભમ્ ॥ ૫.૨૩૦॥

બીજત્રયમિદં ગોપ્યં ભુક્તિમુક્તિફલપ્રદમ્ ।
એતન્મન્ત્રત્રયં યોગી સાધયેત્સિદ્ધિસાધકઃ ॥ ૫.૨૩૧॥

એતન્મન્ત્રં ગુરોર્લબ્ધ્વા ન દ્રુતં ન વિલમ્બિતમ્ ।
અક્ષરાક્ષરસન્ધાનં નિઃસન્દિગ્ધમના જપેત્ ॥ ૫.૨૩૨॥

તદ્ગતશ્ચૈકચિત્તશ્ચ શાસ્ત્રોક્તવિધિના સુધીઃ ।
દેવ્યાસ્તુ પુરતો લક્ષં હુત્વા લક્ષત્રયં જપેત્ ॥ ૫.૨૩૩॥

કરવીરપ્રસૂનન્તુ ગુડક્ષીરાજ્યસંયુતમ્ ।
કુણ્ડે યોન્યાકૃતૌ ધીમાઞ્જપાન્તે જુહુયાત્સુધીઃ ॥ ૫.૨૩૪॥ (યોન્યાકૃતે)

અનુષ્ઠાને કૃતે ધીમાન્પૂર્વસેવા કૃતા ભવેત્ ।
તતો દદાતિ કામાન્વૈ દેવી ત્રિપુરભૈરવી ॥ ૫.૨૩૫॥

ગુરું સન્તોષ્ય વિધિવલ્લબ્ધ્વા મન્ત્રવરોત્તમમ્ ।
અનેન વિધિના યુક્તો મન્દભાગ્યોઽપિ સિદ્ધ્યતિ ॥ ૫.૨૩૬॥

લક્ષમેકં જપેદ્યસ્તુ સાધકો વિજિતેન્દ્રિયઃ ।
દર્શનાત્તસ્ય ક્ષુભ્યન્તે યોષિતો મદનાતુરાઃ ।

પતન્તિ સાધકસ્યાગ્રે નિર્લજ્જા ભયવર્જિતાઃ ॥ ૫.૨૩૭॥

જપ્તેન ચ દ્વિલક્ષેણ યે યસ્મિન્વિષયે સ્થિતાઃ ।
આગચ્છન્તિ યથાતીર્થં વિમુક્તકુલવિગ્રહાઃ ।
સર્વસ્વં તસ્ય દદતિ તસ્યૈવ ચ વશે સ્થિતાઃ ॥ ૫.૨૩૮॥ (દદતિ તસ્ય સર્વસ્વં)

ત્રિભિર્લક્ષૈસ્તથાજપ્તૈર્મણ્ડલીકં સમણ્ડલમ્ ।
(ત્રિભિર્લક્ષૈસ્તથાજપ્તૈર્મણ્ડલીકાઃ સમણ્ડલાઃ ।)
વશમાયાન્તિ તે સર્વે નાત્ર કાર્યા વિચારણા ।
ષડ્ભિર્લક્ષૈર્મહીપાલં સભૃત્યબલવાહનમ્ ॥ ૫.૨૩૯॥

લક્ષૈર્દ્વાદશભિર્જપ્તૈર્યક્ષરક્ષોરગેશ્વરાઃ ।
વશમાયાન્તિ તે સર્વે આજ્ઞાં કુર્વન્તિ નિત્યશઃ ॥ ૫.૨૪૦॥

ત્રિપઞ્ચલક્ષજપ્તૈસ્તુ સાધકેન્દ્રસ્ય ધીમતઃ ।
સિદ્ધવિદ્યાધરાશ્ચૈવ ગન્ધર્વાપ્સરસાઙ્ગણાઃ ॥ ૫.૨૪૧॥

વશમાયાન્તિ તે સર્વે નાત્ર કાર્યા વિચારણા ।
હઠાચ્છ્રવણવિજ્ઞાનં સર્વજ્ઞત્વં પ્રજાયતે ॥ ૫.૨૪૨॥

તથાષ્ટાદશભિર્લક્ષૈર્દેહેનાનેન સાધકઃ ।
ઉત્તિષ્ઠેન્મેદિનીં ત્યક્ત્વા દિવ્યદેહસ્તુ જાયતે ।
ભ્રમતે સ્વેચ્છયા લોકે છિદ્રાં પશ્યતિ મેદિનીમ્ ॥ ૫.૨૪૩॥

અષ્ટાવિંશતિભિર્લક્ષૈર્વિદ્યાધરપતિર્ભવેત્ ।
સાધકસ્તુ ભવેદ્ધીમાન્કામરૂપો મહાબલઃ ॥ ૫.૨૪૪॥

ત્રિંશલ્લક્ષૈસ્તથાજપ્તૈર્બ્રહ્મવિષ્ણુસમો ભવેત્ ।
રુદ્રત્વં ષષ્ટિભિર્લક્ષૈરમરત્વમશીતિભિઃ ॥ ૫.૨૪૫॥

કોટ્યેકયા મહાયોગી લીયતે પરમે પદે ।
સાધકસ્તુ ભવેદ્યોગી ત્રૈલોક્યે સોઽતિદુર્લભઃ ॥ ૫.૨૪૬॥

શિવસંહિતાફલકથનમ્ ।

ત્રિપુરે ત્રિપુરન્ત્વેકં શિવં પરમકારણમ્ ।
અક્ષયં તત્પદં શાન્તમપ્રમેયમનામયમ્ ॥ ૫.૨૪૭॥

લભતેઽસૌ ન સન્દેહો ધીમાન્સર્વમભીપ્સિતમ્ ।
શિવવિદ્યા મહાવિદ્યા ગુપ્તા ચાગ્રે મહેશ્વરી ॥ ૫.૨૪૮॥

મદ્ભાષિતમિદં શાસ્ત્રઙ્ગોપનીયમતોબુધૈઃ ।
હઠવિદ્યા પરં ગોપ્યા યોગિના સિદ્ધિમિચ્છતા ॥ ૫.૨૪૯॥

ભવેદ્વીર્યવતી ગુપ્તા નિર્વીર્યા ચ પ્રકાશિતા ।
ય ઇદં પઠતે નિત્યમાદ્યોપાન્તં વિચક્ષણઃ ॥ ૫.૨૫૦॥

યોગસિદ્ધિર્ભવેત્તસ્ય ક્રમેણૈવ ન સંશયઃ ।
સ મોક્ષં લભતે ધીમાન્ય ઇદં નિત્યમર્ચયેત્ ॥ ૫.૨૫૧॥

મોક્ષાર્થિભ્યશ્ચ સર્વેભ્યઃ સાધુભ્યઃ શ્રાવયેદપિ ।
ક્રિયાયુક્તસ્ય સિદ્ધિઃ સ્યાદક્રિયસ્ય કથમ્ભવેત્ ॥ ૫.૨૫૨॥

તસ્માત્ક્રિયાવિધાનેન કર્તવ્યા યોગિપુઙ્ગવૈઃ ।
યદૃચ્છાલાભસન્તુષ્ટઃ સન્ત્યક્ત્વાન્તરસઙ્ગકઃ ॥ ૫.૨૫૩॥

ગૃહસ્થશ્ચાપ્યનાસક્તઃ સ મુક્તો યોગસાધનાત્ ।
ગૃહસ્થાનાં ભવેત્સિદ્ધિરીશ્વરાણાં જપેન વૈ ।
યોગક્રિયાભિયુક્તાનાં તસ્માત્સંયતતે ગૃહી ॥ ૫.૨૫૪॥

ગેહે સ્થિત્વા પુત્રદારાદિપૂર્ણઃ
સઙ્ગં ત્યક્ત્વા ચાન્તરે યોગમાર્ગે ।
સિદ્ધે ચિહ્નં વીક્ષ્ય પશ્ચાદ્ગૃહસ્થઃ (સિદ્ધેશ્ચિહ્નં)
ક્રીડેત્સં વૈ સમ્મતં સાધયિત્વા ॥ ૫.૨૫૫॥ (ક્રીડેત્સો)

ઇતિ શ્રીશિવસંહિતાયાં હરગૌરીસંવાદે યોગશાસ્ત્રે
પઞ્ચમપટલઃ સમાપ્તઃ । ૫।

ઇતિ શુભમ્ ।

NB: The shloka numbering and line clubbing varies considerably amongst the publications referenced and even their respective editions.
Some verses in the referenced texts do have odd number of lines.
The numbering above in sequence is done for reference.
There is no intention of creating newer version.
Amongst the referenced versions, Khemraj Publications were found to have more shlokas than others, of which the 1984 edition is the latest.

Compiled and proofread by Ruma Dewan

*Shivasamhita*

pdf was typeset on June 10, 2022

Please send corrections to *sanskrit@cheerful.com*